कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशायनमः॥ ॥ अथज्योतिःशास्त्रशीघ्रबोधानुक्रमणिकालिख्यते॥ ॥

			युति	१२	नामकरणं	१४	योगिनीचक्रं
१	विवाहर्क्षाणि	६	जामित्र	१२	निष्क्रमणं	१५	तिथिफलं
१	विवाहमासाः	६	पंचबाणाः	१२	वस्त्रपरिधानं	१५	राहुचक्रं
२	विह्निलक्षणं	६	उपग्रहाः	१२	नवान्नभोजनं	१५	चंद्रचक्रं
२	दग्धतिथयः	७	एकार्गला	१२	अन्नप्राशनं	१५	रविचारः
२	कुलिकयोग	७	क्रांतिसाम्य	१२	चूडाकरणं	१५	रवियोगः
३	वर्गप्रीति	८	दोषचतुष्क	१२	विद्यारंभः	१५	मुहूर्तकुलिकः
३	गणप्रीति	८	विश्व	१२	उपनयनं	१५	मुहूर्तदेवताः
३	राशिमेलनं	८	क्रूरग्रहाः	१३	कर्णवेधः	१५	सर्वांकयोगः
३	वर्णप्रीति	९	होलाष्टक	१३	स्त्रीप्रसूतिस्नानं	१५	यात्राप्रकरणं
३	नक्षत्रप्रीति	९	गोधूलि	१३	जलवापी	१५	शुक्रदोषविचारः
३	वश्यप्रीति	१०	रखाग्रहाः	१३	हलप्रवाहः	१५	विद्यारंभः
४	योनिप्रीति	१०	दिनलग्नमानं	१३	वास्तुकर्म	१६	क्रयविक्रयो
४	षडष्टकवि.	१०	रात्रिलग्नमानं	१४	देवालयादि	१६	वस्त्रसुवर्णपरिधानं
४	रविबल	१०	फणिचक्रं	१४	गृहप्रवेशः	१६	पंचकं
४	गुरुबल	११	वर्ज्ययोगाः	१४	दिक्शूलं	१६	अभ्यंगः
४	चंद्रबल	११	पट्टचक्रं	१४	सर्वदिग्गमननक्षत्राणि	१६	वधूप्रवेशः
५	लता	११	द्विरागमनं				
५	पात						

Acc. No. ~~2002~~ M-1646
Title - शीघ्रबोध.
~~Author~~ Author - काशीनाथ.
Date - शके 1704
Subject - ज्योतिष.

folio - 40
Xerox - 78

K K S U LIBRARY
RAMTEK
441 106
M-1646
Dist Nagpur

Checked 2012

१६ रोगीस्नानं
१७ राजमुहूर्त्ता:
१७ आनंदादय:
१७ अमृतसिद्धियो·
१ १७ उत्पातमृत्युका
णसिद्धियोगा:
१७ क्रकचयोग:
१७ यमघट
१७ मृत्युयोग
१७ सिद्धियोग
१८ अंधाक्षचिपि·
टाक्षादि
१८ दक्षिणचारीऋ
क्षाणि
१८ उत्तरचारीऋ
क्षाणि
१८ मध्यचारीऋ
क्षाणि
१८ नक्षत्रतारासंख्या
१८ रोगदोषस्नानं
१९ चरचलादिनक्षत्रसंज्ञा
२० शनिचक्रं
२० शनिचार:
२१ एकमासेपंचवारफलं
२१ अभिजिन्मुहूर्त्तफलं
२१ शुक्रोदयफलं
२१ होलिकाफलं
२२ संक्रांत्याधारनक्षत्रफलं
तत्मासिमासिसेयं
२२ राशिचक्रं
२३ रोहिणीफलं
२३ नरचक्रं
२३ ग्रामवासफलं
२३ मूळर्क्षफलं
२४ गोचरफलं
२४ क्षौरदिनानि
२४ राजाभिषेक
२५ नक्षत्रेकार्याकार्यवि·
२५ भिषक्कर्म
२५ पशुनिर्गम
२५ पशुप्रवेश
२५ पशूनांक्रयविक्रय:
२६ गंडांतफलं
२६ विष्कंभादियोगा:
२६ करणानि १
२६ नक्षत्राधिपतय:।
२७ प्रश्नकालेफलाफलवि·
२७ अंगस्पर्शलक्षणं
२७ लग्नघटीपरिमाणं
२८ ग्रहाणांदानानिश्लोका:

२८ बृहस्पतिविचारः
२८ संक्रांतिदृष्टिफलं
२८ प्रतिमासपंचमीफलं
२९ प्रतिमासपौर्णिमाफ.
२९ आषाढशु-२ दिनचतुष्क
२९ ग्रहाणांक्षेत्रविचारः
३० समर्घसुभिक्षविचारः
३० राशिग्रहयोगफलं
३१ ग्रहोदयोराशिफं.
३१ नक्षत्रगुरुचारः
३२ चूचेचोलाश्विन्या
दिनक्षत्रनामानि
३२ आलामेषराशिना.
३२ लग्नकुंडलिका
३२ तनुभावविचारः
३३ सप्तविंशतिभानांनवभिर्नवभिः पदैर्मेषाद्याराशयः
३३ कोटिहोमक्षाणि
३४ प्रभवादिषष्टिवत्सराः
३४ राशीनामधिपाः
३५ ग्रहाणांराशिस्थितिः
३५ शुक्रोदयास्तविचारः
३५ गृहद्वारविचारः।
३६ ग्रहफलं
३६ धूलिवृष्ट्यादिफलं
३७ केतूदयफलं
३७। इतिश्रीप्रबोधानुक्रमः॥

॥ अथ श्री शीघ्रबोधः प्रारंभः श्री ॥

श्रीगणेशायनमः॥ ॥भासयंतंजगद्भासानत्वाभास्वंतमव्ययं॥ क्रीयतेका
शिनाथेनशीघ्रबोधायसंग्रहः॥१॥ रोहिण्युत्तररेवसोमूलंस्वातीमृगो
मघा॥ अनूराधाचहस्तश्चविवाहेमंगळप्रदाः॥२॥ ॥इतिविवाहन
१ क्षत्राणि॥ ॥माघेधनवतीकन्याफाल्गुनेसुभगाभवेत्॥ वैशाखेचत
थाज्येष्ठेपत्युरत्यंतवल्लभा॥३॥ आषाढेकुळवृद्धिःस्यादन्येमासाविव
र्जिताः॥ मार्गशीर्षमपीछंतिविवाहेकेपिकोविदाः॥४॥ ॥इतिविवा
हमासाः॥ ॥अमावास्याचरिक्ताचवारवेळाचजन्मभं॥ गंडांताः १
क्रूरवाराश्चवर्जनीयाःप्रयत्नतः॥५॥ नंदाभद्राजयारिक्तापूर्णा
स्तुतिथयःक्रमात्॥ वारत्रयंसमावर्त्योस्तिथयःप्रतिपन्मुखाः॥६॥
तूर्योर्केसप्तमश्चंद्रेद्वितीयोभूमिनंदने॥ चंद्रपुत्रेपंचमश्चदेवाचा

र्येतथाष्टमः॥७॥ दैत्यपूज्येत्रतीयश्चरानोषष्ठश्चनिंदितः॥ प्रहरार्धःशुभे
कार्येवारवेलेतिकथ्यते॥८॥ भद्राक्रकचयोगांश्चतिथ्यंतंयमघंटकं॥
दग्धातिथिश्चभांतंचकुलिकंचविवर्जयेत्॥९॥ दशम्यांचतृतीयायां
कृष्णपक्षेपरेदले॥ सप्तम्यांचचतुर्दश्यांविष्टिःपूर्वेदलेस्मृता॥१०॥
शुक्लाष्टम्यांचपूर्णायांभद्रापूर्वेदलेमता॥ एकादश्यांचतुर्थ्यांचसे
वापरदलेमता॥११॥ ॥इतिविष्टिलक्षणं॥ ॥द्वितीयाधनमीनेषु
चतुर्थीवृषकुंभयोः॥ मेषकर्कटयोःषष्ठीयुग्मसत्योस्तथाष्टमी॥१२॥
दशमीवृश्चिकेसिंहेद्वादशीमकरेतुले॥ एतास्तुतिथयोदग्धाःशु
भकुर्मणिविवर्जयेत्॥१२॥ ॥इतिदग्धास्तिथयः॥ ॥मासांतेम्रि
यतेकन्यातिथ्यंतेस्यादपुत्रिणी॥ नक्षत्रांतेचवैधव्यंविष्ट्यांम्र

त्युर्द्वयोर्भवेत्॥१४॥मासांतेदिनमेकंतुतिथ्यंतेघटिकाद्वयं॥ऋ
क्षांतेघटिकास्तिस्रोविवाहादिषुवर्जयेत्॥१५॥सूर्येचसप्तमी
सोमेषष्ठीभौमेथपंचमी॥बुधेचतुर्थीदेवेज्येत्तृतीयाभृगुनंद
२ ने॥१६॥द्वितीयावर्जनीयाच्चप्रतिपच्चशनैश्चरे॥कुलिकाख्यो
हियोगोयंविवाहादौनशस्यते॥१७॥ ॥इतिकुलिकयोगः
॥ ॥अवर्गोगरुडोज्ञेयोविडालस्यात्कवर्गकः॥चवर्गःसिं
हनामास्याट्टवर्गःकुक्कुटःस्मृतः॥१८॥सर्पाख्यःस्यात्तव २
र्गोपिपवर्गोमूषकोमतः॥यवर्गोमृगनामास्यात्तथामेष
शावर्गकः॥१९॥स्वस्ववर्गात्पंचमःशत्रुश्चतुर्थोमित्रएवच॥उदासीनस्तृतीयोपि
वर्गभेदस्त्रिधोच्यते॥२०॥स्ववर्गेपरमाप्रीतिर्मित्रेप्रीतिश्चकथ्यते॥उदासीनेप्रीतिर

ल्पाशत्रुवर्गेमृतिर्भवेत्॥इतिवर्गप्रीतिः॥२१॥अश्विनीमृगरेवत्योहस्तःपुष्यःपुनर्वसुः॥अनुराधाश्रुतिस्वातीकथ्यतेदेवतागणः॥२२॥तिस्रःपूर्वाउत्तराश्चतिस्रआर्द्राचरोहिणी॥भरणीचमनुष्याख्योगणोयंकथ्यतेबुधैः॥२३॥कृत्तिकाचमघाश्लेषाविशाखाशततारका॥चित्राज्येष्ठाधनिष्ठाचमूलंरक्षोगणःस्मृतः॥२४॥स्वगणेपरमाप्रीतिर्मध्यमादेवमर्त्ययोः॥मर्त्यराक्षसयोर्मृत्युःकलहोदेवरक्षसां॥२५॥इतिगणप्रीतिः॥षष्ठेस्त्रीपुंसयोर्वैरंमृत्युःस्यादष्टमेध्रुवं॥द्विर्द्वादशेचदारिद्र्यंनवमेपंचमेकलिः॥२६॥इतिराशिमेलनं॥मीनालिकर्कटाविप्राःक्षत्रीमेषोहरिर्धनुः॥शूद्रायुग्मतुलाकुंभावेश्याःकन्यामृगोवृषः॥२७॥नोत्तमामुद्वहेत्कन्यांब्राह्मणीचविशेषतः॥म्रियतेहीनवर्णस्यब्रह्मणासदृशोयदि॥२८॥इतिवर्णप्रीतिः॥

पौष्णादिकं षट्कमुत्तरांतिपूर्वमार्द्रादिकं द्वादशमध्यभागं ॥ पौरंदरा
द्यंनवकं भचक्रपरं विभागं गणकाविदग्धाः ॥२९॥ पूर्वभागेप
तिप्रीतिर्मध्यभागे चकन्यका ॥ परभागे च नक्षत्रे द्वयोः प्रीतिर्म
३ हीयसी ॥३०॥ इति नक्षत्रप्रीतिः ॥ सिंहं विना वशाः सर्वे
द्विपदानां चतुष्पदाः ॥ भक्ष्या जलचरास्तेषां भयस्थाने सरीसृपाः
॥३१॥ मकरस्य पूर्वभागो मेषः सिंहो धनुर्वृषः ॥ चतुष्पदाः कीटसं
स्ताः कर्कः सर्पश्च वृश्चिकः ॥३२॥ वश्यप्रीतिः ॥ अश्विनी वा
रुणी चाश्वौ रेवती भरणी गजौ ॥ पुष्यश्च कृत्तिका छागौ नागश्च रो २
हिणी मृगौ ॥३३॥ आर्द्रा मूल मथश्वानौ मूषकः फाल्गुनी म
घा ॥ मार्जारो दितिराश्लेषा गोजातिरुत्तरात्रयं ॥३४॥ माहि

षःस्वातिहस्तौचमृगोज्येष्ठानुराधिका॥ व्याघ्रश्चित्राविशाखाच
श्रुत्साषाढौचमर्कटः॥३५॥शतभाद्रपदेसिंहोनकुलश्चाभिजि
त्स्मृतः॥ योनयःकथिताभानांवैरंमैत्रीविचार्यतां॥३६॥ इ
तियोनिप्रीतिः॥ ॥मरणोपितृमात्रोश्चनग्राह्योनवपंचमो॥वर
स्यपंचमेकन्याकन्यायानवमेवरः॥३७॥एतत्त्रिकोणकंग्राह्यं
पुत्रपौत्रसुखावहं॥षडष्टकेभवेन्मृत्युर्यतस्तत्रविचारयेत्॥३८॥
॥ इतिरासीमेलनं ॥वरस्यभास्करबलंकन्यायाश्चगुरोर्बलं॥
द्वयोश्चंद्रबलंग्राह्यंविवाहोनान्यथाभवेत्॥३९॥अष्टमेचच
तुर्थेचद्वादशेचदिवाकरे॥विवाहितोनरोमृत्युंप्राप्नोत्यत्रन
संशयः॥४०॥एकादशेतृतीयेवाषष्ठेवादशमेतथा॥वरस्य

शुभदोनित्यंविवाहेदिननायकः ॥४१॥ इतिरविफलं ॥ अष्टमेद्वादशेस्था
नेचतुर्थेवाबृहस्पतौ ॥ पूजातत्रनकर्तव्याविवाहः प्राणनाशकः ॥४२॥
षष्ठेजन्मनिदेवेज्येतृतीयेदशमेपिवा ॥ नवमेचसुराचार्येकन्यायाःक
४ थितःशुभः ॥४३॥ इतिगुरुफलं ॥ आद्येचंद्रःश्रियंकुर्यान्मनःस्तापं
द्वितीयके ॥ तृतीयेधनसंपत्तिः चतुर्थेकलहागमं ॥ पंचमेज्ञानवृद्धिं
चषष्ठेसंपत्तिरुत्तमा ॥ सप्तमेराजसन्मानंमरणंचाष्टमेतथा ॥४५॥
नवमेधर्मलाभंचदशमेमानसेप्सितं ॥ एकादशेसर्वलाभंद्वादशेहा
निमेवच ॥४६॥ इतिचंद्रफलं ॥ अष्टवर्षाभवेद्गौरीनववर्षातुरो ४
हिणी ॥ दशवर्षाभवेत्कन्याअतऊर्ध्वरजस्वला ॥४७॥ द्वादशेकाद
शेवर्षेयस्याःशुद्धिर्नजायते ॥ पूजाभिःशकुनैर्वापितस्यालग्नंप्रदा
पयेत् ॥४८॥ गुरुरबलोसुभगीयद्येकादशवत्सरा ॥ गणकोविधि

वद्योवैसज्ञेयोब्रह्महाबुधेः॥ ४९॥ पंचोर्ध्वास्थापयेद्रेखाः पंचतिर्यग्गु
खास्तथा॥ द्वयोश्चकोणयोर्द्वेद्वेचक्रंपंचशलाकया॥ ५०॥ ईशाने
कृत्तिकाद्याक्रमादन्यानिभानिच॥ ग्रहास्तेषुप्रदातव्यायेचयत्रप्र
तिष्ठिताः॥ ५१॥ लग्नस्यनिकटेयावग्गताभवतिपोर्णिमा॥ तन्नक्ष
त्रेस्थितश्चंद्रोदातव्योगणकोत्तमैः॥ ५२॥ लत्तापातोयुतिर्वेधोजा
मित्रंबुधपंचकं॥ एकार्गलोपग्रहोचक्रांतिसाम्यंतथापरं॥ ५३॥
दग्धातिथिश्चविज्ञेयादशदोषामहाबलाः॥ एतान्दोषान्परित्यज्य
लग्नंसंशोधयेद्बुधः॥ ५४॥ नक्षत्रंद्वादशंभानुस्तृतीयंलत्तयाकुजः॥
षष्ठंजीवोष्टमंमंदोहंतिदक्षिणतःसदा॥ ५५॥ वामेनसप्तमंचां
द्रिर्नवमंसिंहिकासुतः॥ हंतिभंपंचमंशुक्रोद्वाविंशंपूर्णचंद्रमाः
॥ ५६॥ रवेर्लत्ताहरेद्वित्तंकुजस्यकुरुतेमतिं॥ बृहस्पतेर्वित्त

नाशंशनेःकुर्यात्कुलक्षयं॥५७॥बुधस्यकुरुतेत्रासंलत्ताराहोर्वि
नाशयेत्॥शुक्रस्यदुःखदानित्यंत्रासदाचकलानिधेः॥५८॥ ॥इ
तिलत्ता॥ सूर्यभुक्ताच्चनक्षत्रादेषुपातोविधीयते॥मघाश्लेषाच
चित्राचसानुराधाचरेवती॥५९॥श्रवणोपिचषट्कोयंपातदुष्टोनिग
द्यत्ते॥अश्विनीमवधिंकृत्यगणयेल्लग्नभावर्जि॥६०॥पावकः
पावमानश्चविकारःकलहोपरः॥मृत्युःक्षयश्चविज्ञेयःपातषट्क
स्यलक्षणं॥६१॥पातेनपतितोब्रह्मापातेनपतितोहरिः॥पा
तेनपतितःशंभुस्तस्मात्पातंविवर्जयेत्॥६२॥ इतिपातः॥ए
करेखास्थितोवेधोदिननाथादिभिर्ग्रहैः॥विवाहेतत्रमासंतु
नजीवतिकदाचन॥६३॥अभिजिच्चापिरोहिण्यांकृत्तिकाच
विशाखया॥अश्विनीचैवफाल्गुन्याभरणीचानुराधया॥म
६४

गश्चोत्तरषाढेचपूर्वाषाढातथार्द्रया ।। पुनर्वसुश्चमूळेनतथापुष्यश्च
ज्येष्ठया ।। ६५ ।। धनिष्ठयातथाश्लेषामघापिश्रवणेनच ।। रेवत्युत्त
रफाल्गुन्यांहस्तेनोत्तरभाद्रपात् ।। ६६ ।। स्वासाशतभिषाविद्धा
चित्रयापूर्वभाद्रपात् ।। विद्धास्तेतानिवर्ज्यानिविवाहेभानिकोवि
दैः ।। ६७ ।। रविवेधेचवैधव्यंकुजवेधेकुलक्षयः ।। बुधवेधेभवे
द्वंध्यासप्रज्यागुरुवेधतः ।। ६८ ।। अपुत्राशुक्रवेधेचसोरेश्चंद्रे
चदुःखदा ।। परपत्योरताराहोकेतोस्वछंदचारिणी ।। ६९ ।।
यत्रगेहेभवेच्चंद्रोग्रहस्तत्रयदाभवेत् ।। युतिदोषस्तदाज्ञेयो
विनाशुक्रंशुभाशुभं ।। ७० ।। रविणासंयुतोहानिंभौमेननि
धनंशशी ।। करोतिमूळनाशंचराहुकेतोशनिश्चरैः ।। ७१ ।।
।। ।। इतियुति ।। ।। चतुर्दशंचनक्षत्रंजामित्रंलग्नभात्स्मृतं ।।

शुभयुक्तं न दिछंति पापयुक्तं च वर्जयेत् ॥७२॥ चंद्रश्चांद्रः शुक्रजीवौ
जामित्रेशुभकारका ॥ स्वर्भानुभानुमंदारा जामित्रे अशुभप्रदाः
॥७३॥ चंद्राद्वा लग्नतो वापि ग्रहो वर्ज्यश्च सप्तमे ॥ तत्रस्थिताग्र
हान्नूनं आधिवैधव्यकारकाः ॥७४॥ इति जामित्रं ॥ धार्याति
थिर्मासदृशाष्टवेदाः संक्रांतितो यातदिनेश्चयोज्या ॥ ग्रहे विभ
क्तायदि पंचकं स्याद्रोगस्तशाग्निर्नृपचोरमृत्यु ॥७५॥ इति
पंचबाणाः ॥ सूर्यभात्संचमे विद्युन्नक्षत्रे शूलमष्टमे ॥ चतुर्दशे
शनैःपातः केतुरष्टादशे तथा ॥७६॥ ऊनविंशे भवेदुल्कानि
र्घातश्च द्विविंशतिः ॥ त्रयोविंशतिके कंपश्चतुर्विंशे च वज्रकः ॥
॥७७॥ पुत्रनाशकरी विद्युस्तस्युः शूलो विनाशकः ॥ शनैः
पातो वंशघाती केतोर्देवरघातकः ॥७८॥ कुलनाशकरी

चोल्कानिर्घातोबंधुनाशकः।। कंपः कंपयतेनित्यंवर्ज्येस्त्रीव्यभिचा
रिणी।।७२।। ।।५।८।१४।१८।१९।२२।२३।४४।। इतिउपग्रहः ।।
एकामूर्ध्निगतात्रयोदशातथातिर्यकुस्थितास्थापयेद्रेखाचक्रमि
दंबुधैर्निगदितंखार्जूरिकंतत्रतू।। व्याघातादिषुमूर्ध्निभंतुकथि
तंतत्रैकरेखास्थयोः सूर्याचंद्रमसोर्मिथोनिगदितोदृक्पात
एकार्गला।।८०।। योगांकेविषमेचैकोदेयोष्टाविंशतिः समे।।
अर्द्धीकृत्याश्विनीपूर्वमंकभंमूर्ध्निदीयते।।८१।। विष्कंभेचाश्वि
नीदेयाप्रीतौस्वातीनिगद्यते।। सौभाग्येचविशाखास्यादा
युष्मान्भरणीयुतः।।८२।। शोभनेकृत्तिकादेयानुराधाचातिगं
डके।। रोहिणीचसुकर्माख्येधृतौज्येष्ठाप्रकीर्तिता।।८३।। गंडे

श्रूलं मृगः श्रूले वृद्धो चार्द्रा निगद्यते ॥ पूर्वाषाढा ध्रुवे देया व्याघाते च पुनर्वसुः ॥ ८४ ॥
हर्षणे चोत्तराषाढा वज्रे पुष्यः प्रकीर्त्तितः ॥ अभिजिच्च तथा सिद्धौ ह्याश्लेषा व्य
तिपातके ॥ ८५ ॥ वरीयान्विश्रुतिर्देया परिघे च मघा तथा ॥ शिवे धनिष्ठा
दातव्या सिद्धौ पूर्वा च फल्गुनी ॥ ८६ ॥ साध्ये शतभिषा देया शुभे चोत्तर
फाल्गुनी ॥ पूर्वाभाद्रपदा शुक्ले हस्तो ब्रह्मणि कीर्तितः ॥ ८७ ॥ ऐंद्रे त्वुत्त
रभाद्रा च चित्रा देया च वैधृतो ॥ सूर्यचंद्रमसोर्योगे भवेदेकार्गलस्तदा ॥
॥ ८८ ॥ इति एकार्गलः ॥ ऊर्ध्वास्तिस्त्रस्तिरस्तिस्त्रो मध्ये मीनालि
ले हुधः ॥ सूर्याचंद्रमसो दृष्टो क्रांतिसाम्यं निगद्यते ॥ ८९ ॥ मीनः क
न्यकया युक्तो मेषः सिंहेन संगतः ॥ मकरेण वृषः क्रांतश्चापोपि मिथु
नेन च ॥ ९० ॥ कर्केणावृश्चिको विद्धो वेधश्च तुळकुंभयोः ॥ क्रांतिसा
म्यकृतो द्वाहो न जीवति कदाचन ॥ ९१ ॥ ॥ इति क्रांतिसाम्यं ॥ ॥
मर्मभेदः कंठकश्च शल्पं छिद्रं चतुर्थकं ॥ एतद्वाष चतुष्कं च परि

त्याज्यंप्रयत्नतः॥९२॥ ॥इतिदोषचतुष्कं॥ ॥लग्नेपापेमर्मवेधःकं
टकोनवपंचमे॥चतुर्थेदशमेशस्यांछिद्रंभवतिसप्तमे॥९३॥मरणं
मर्मवेधेस्यात्कंटकेचकुलक्षयः॥शल्येचन्नृपतेर्भीतिःपुत्रनाशश्च
छिद्रके॥९४॥नकन्यावरयोर्ज्येष्ठेज्येष्ठयोःपाणिपीडनं॥द्वयोरे
कतरेज्येष्ठेनज्येष्ठोदोषमाहरेत्॥९५॥सिंहेगुरोगतेकार्योविवा
होनकदाचन॥मेषस्थेचदिवानाथेसिंहस्थोपिशुभप्रदः॥९६॥
रविःसार्धत्रयोभागाश्चंद्रेपंचगुरोस्त्रयः॥द्वौशुक्रेद्वौचंद्रपुत्रेभागा
विश्वाप्रदाअमी॥९७॥प्रत्येकंसार्धभागाश्चमंदमंगलराहुषु॥
ग्रहाबलयुताविश्वाःप्रयच्छंतिनदुर्बलाः॥ ॥इतिविश्वे॥ ॥कें
द्रेसत्यमहीनेचद्वित्रिकोणेशुभाःशुभाः॥धनेशुभःसदाचंद्रःपा
पाःषष्ठेचशोभनाः॥९८॥तृतीयेकादशेसर्वेसौम्याःपापाःशुभप्रदाः॥

तेचसर्वेसप्तमस्थामृत्युदावरकन्ययो:॥ १०० ॥शनि:सूर्यश्चल
ग्नास्तेचंद्रोलग्नेष्टमेरिपो॥कुजोलग्नेष्टमेचास्तेशुक्रोद्यूनेष्ट
मेरिपो॥१॥गुरुर्मृत्यौसैंहिकेयोलग्नेसूर्येचसप्तमे॥बुधो
८ ष्टमेचजामित्रेविवाहेप्राणनाशक:॥२॥ ॥इतिभंगदाग्र
हा:॥ ॥क्रूरग्रहशुभाशुभविचार:॥ ॥तुलाचमिथुनंकन्या
पूर्वार्धेधनुषोवृष:॥एतेलग्ना:शुभानित्यंमध्यमाश्चपरेस्थि
ता:॥३॥लत्तांमालवकेदेशेपातंचकुरुजांगले॥एकार्गलं
चकाश्मीरेवेधंसर्वत्रवर्जयेत्॥४॥मेषेनवांशामेषाद्यावृ ८
षेचमकरादिका:॥ ।मिथुनेचतुलाद्या:स्यु:कर्कटेकर्कटा
दिका:॥५॥मेषाद्योचधनु:सिंहोगो:कन्यामकरादि

को॥ तुलाद्योयुग्मकुंभौचककौद्यौमीनवृश्चिकौ॥ ६॥ गोतु
ळायुग्मकन्यानांनवांशाःशुभदाःस्मृताः॥ धनुषःप्रथमो
भागा।विवाहेन्येचमध्यमाः॥ ७॥ अंशस्यपतिरंशेचेत्तन्मि
त्रं वाशुभोपिवा॥ पश्येत्तदाशुभाज्ञेयाःसर्वदोषाश्चनिःफ
ळाः॥ ८॥ शुक्लाष्टमींसमारभ्यफाल्गुनस्यदिनाष्टकं॥
पूर्णिमामवधिंत्याज्यंहोलाष्टकमिदंसदा॥ ९॥ शुतुद्र्यांचवि
पाशायामैरावत्यांत्रिपुष्करे॥ होलाष्टकविवाहादौत्याज्यमन्य
त्रशोभनं॥ १०॥ ॥ इतिहोलाष्टकं॥ ॥ वृषाजसिंहादिननेत्र
हीनारात्रौचकन्यामिथुनेकुलीरः॥ मृगस्तुलालिर्बधिरोप
राण्हेसंध्यासुकुब्जाघटधन्विमीनाः॥ ११॥ दिवांधोवरहं

ताचराश्चंधोधननाशकः॥दुःखदोबधिरोलग्नः कुब्जोवंशविनाश
कः॥१२॥यत्रचैकादशश्चंद्रोद्वितीयोवातृतीयकः॥गोधूलिकः स
विज्ञेयः शेषाधूलिमुखाः स्मृताः॥१२॥ कुलिकक्रांतिसाम्ये वा
लग्नेषष्ठाष्टमेराशी॥ तदागोधूलिकस्त्याज्यः पंचदोषेण दू
षितः॥१४॥यदानास्तंगतोभानुर्गोधूल्यापरितंनभः॥सर्वी
मंगळकार्येषुगोधूलिश्चप्रशस्यते॥१५॥अष्टमे जीवभौमौ च
बुधश्चभार्गवोष्टमे॥लग्नेषष्ठेष्टमेचंद्रेगोधूलिर्नाशकस्तदा॥
॥१६॥ ॥इतिगोधूलिः॥ लग्नादेकादशाः सर्वेलग्नपुष्टिक
राग्रहाः॥तृतीयेचाष्टमेसूर्यःसूर्यपुत्रश्चशोभनः॥१७॥चंद्रो
धनेतृतीयेवाकुजः षष्ठेतृतीयके॥बुधेज्योनवषड्वृद्धित्रिस

तुः पंचदशस्थितो ॥१८॥ शुक्रो द्वित्रिचतुः पंचधर्मकर्मतनुस्थि
ताः॥ राऊर्दशाष्टषट्पंचत्रिनवद्वादशे शुभाः॥१९॥ इति रे
खाग्रहाः॥ छायापादे रसोपेते रेकविंशाछतं भजेत्॥ लब्धां
के घटिकाज्ञेयाः शेषांके चपलाः स्मृताः॥२०॥ ॥इति दिन
लग्नज्ञानं॥ ॥पूर्वाषाढानुराधा च ज्येष्ठाश्लेषा च रेवती॥ वि
शाखा च यदा मूर्ध्नि तदा स्यादष्टमोदयः॥२१॥ मस्तके मृग
शीर्षे च मूले च नवमोदयः॥ अन्यमृक्षं यदा मूर्ध्नि तदा स्या
त्सप्तमोदयः॥ २२॥ सूर्यभान्मौलिभं गण्यं सप्तहीनं च शेष
कं॥ द्विगुणं चद्विहीनं च गतारात्रिस्फुटा भवेत्॥ ॥इति रात्रि
लग्नज्ञानं॥ ॥किं कुर्वंति ग्रहाः सर्वे यस्य केंद्रे बृहस्पतिः॥

मत्तमातंगयूथानां शतं हंति च केसरी ॥२४॥ शुक्रोदशसहस्त्रा
णिबुधोदशशतानिच ॥ लक्षमेकंतुदोषाणां गुरुर्लग्नेव्यपो
हति ॥२५॥ सर्पाकारंलिखेच्चक्रं विवाहेचत्रिनाडिकं ॥ अश्वि
नीप्रमुखंभं चदत्वा साम्यंविचारयेत् ॥२६॥ एकनाडिस्थन
क्षत्रेदंपत्योर्मरणंध्रुवं ॥ सेवायांचभवेद्धानिर्विवाहेत्वशुभंभ
वेत् ॥२७॥ इतिफणिचक्रं ॥ परिघार्धव्यतीपातेवैधृतिं
सकलांत्यजेत् ॥ विष्कंभे
घटिकाःपंचशूलेस
प्तप्रकीर्तिताः ॥ षड्गं
डेचातिगंडेचनवव्याघातवज्रयोः ॥२८॥



अ	आ	पु	उ	ह	ज्ये	मू	श	पू
भ	मृ	पु	पू	चि	अ	पू	ध	उ
कृ	रो	आ	म	स्वा	वि	उ	श्र	रे

॥ इतिवर्जीयोगाः॥ पट्टाकारंलिखेच्चक्रमष्टकोणसमन्वितं॥
यस्मिंनक्षत्रेभवेत्सूर्यस्तदाद्यंमध्यगत्रयं॥३०॥त्रयंत्रयंचसर्व
त्रततःपूर्वादितोलिखेत्॥नक्षत्रत्रितयंमध्येपक्षद्वयविनाश
कं॥३१॥पूर्वस्थानेभवेल्लक्ष्मीर्धनधान्यसमागमः॥अग्निको
णेभवेन्मृत्युर्नारीकुलविनाशिनी॥३२॥दक्षिणेदुर्भगाना
रीदारिद्रंदुःखमाप्नुयात्॥नैर्ऋत्येपुत्रलाभश्चसुखसौभा
ग्यमेवच॥३३॥पश्चिमेविधवाकन्यावायव्येव्यभिचारिणी॥
उत्तरेधनधान्यानिईशान्येसर्वसंपदः॥३४॥मांगल्येसर्वका
र्यंचपट्टचक्रंविचारयेत्॥गर्गाचार्येणसंप्रोक्तंसर्वसिद्धि
प्रदायकं॥३५॥ इतिपट्टचक्रं ॥इतिश्रीकाशीनाथकृ

24

तोशीप्रबोधेप्रथमंप्रकरणं १॥ ॥धात्युग्मंहयोमैत्रंश्रुतियुग्मं
करत्रयं॥पुनर्वसुद्वयंपूषामूलंवाप्युत्तरात्रयं॥१॥विषमोव
त्सरोमासोमार्गोमाधवेफाल्गुनो॥मकरोमिथुनोमीनोलग्ने
कन्यातुलाधरः॥२॥भौमार्किवर्जितावाराग्रह्यंतेत्रद्विरागमे
॥षष्ठीरिक्ताद्वादशीचअमावास्याविवर्जिताः॥३॥ इतिद्विरा
गमनं॥ आर्द्रात्रयंभाद्रयुग्मंमृगःपूषाश्रुतिःकरः॥मूलत्रयं
गुरुःसूर्योभौमंरिक्तांविनातिथिं॥४॥आद्येद्वयेत्रयेमासे
लग्नेकन्याझषे।स्थिरे॥पुनर्वसुद्वयेहस्तत्रयेमैत्रत्रयेमृगे॥
॥५॥मूलोत्तराधनिष्ठासुद्वादशौकादशोदिने॥ अन्यत्रापि
शुभेयोगेकरेबुधशशांकयोः॥भानौगुरौस्थिरेलग्नेबालना

मकृतिःशुभा॥७॥ इतिनामकरणं ॥मैत्रत्रयेहरिद्वंद्वेविधिद्वंद्वे
दितिद्वये॥स्वातीहस्तोत्तराषाढेपूषार्यमहयेषुच॥८॥सिंहत्रय
घटेलग्नेमासयोस्त्रिचतुर्थयोः॥यात्रातिथोचनिःकास्यःशिशु
नैवार्किभोमयोः॥९॥ इतिनिष्क्रमणं ॥हस्तादिपंचकेश्विन्यांध
निष्ठायांचपूषणि॥१०॥गुरौशुक्रेबुधेवारेस्त्रीभिर्धार्य्यंनवांबरं॥
लग्नोमीनश्चकन्याचमीनश्चवृषभःशुभः॥११॥पुंसांपुनर्वसुद्वंद्व
रोहिण्युत्तरभेषुच॥ इतिवस्त्रपरिधानं ॥नवान्नभोजनेग्राह्यं
वस्त्रप्रोक्तमशेषतः॥वारेधिकौसूर्यसोमौनक्षत्रेश्रवणोमृगः॥
॥१२॥ ॥इतिनवान्नभोजनं॥ अथान्नप्राशनेपूर्वासपार्द्रेव
रुणायमः॥द्वादशीसप्तमीरिक्तापर्वनिंद्यास्तुवर्जिताः॥१३॥मा
सोषष्ठाष्टमोपुंसास्त्रीणांमासश्चपंचमः॥ इत्यन्नप्राशनं॥

पुनर्वसुद्वयेज्येष्ठामृगेचश्रवणद्वये॥हस्तत्रयेचरेवत्यांशुक्लपक्षोत्तरा
यणे॥१४॥लग्नेगोस्त्रीधनुःकुंभेमकरेमन्मथेतथा॥सौम्येवारेशु
भेयोगेचूडाकर्मस्मृतंबुधेः॥१५॥हेयस्तुजन्ममासश्चचूडाकर्मणि
जन्मभं॥रिक्तापर्वाणिषष्ठीचप्रतिपच्चतिथिष्वपि॥१६॥ इतिचू
१२ डाकरणं ॥हस्तात्रयेहरिद्वंद्वेपूर्वाश्विमृगपंचके॥मूळेपुष्येच
नक्षत्रेबुधेर्केगुरुशुक्रयोः॥१७॥देवोत्थानेमीनचापेलग्नेवर्षेच
पंचमे॥विद्यारंभोत्रवर्ज्योश्चषष्ठ्यनध्यायरिक्तकाः॥१८॥ इतिवि
द्यारंभः॥ ॥पूर्वाषाढाश्विनीहस्तत्रयेचश्रवणत्रये॥ज्येष्ठामृगशिरे
पुष्येरेवत्यांचोत्तरायणे॥१९॥द्वितीयायांतृतीयायांपंचम्यांदश १२
मीत्रये॥सूर्येशुक्रसुराचार्येवारेपक्षेतथासिते॥२०॥लग्नेवृषध
नुःसिंहेकन्यामकरयोरपि॥व्रतबंधःशुभेयोगेब्रह्मक्षत्रविशां

भवेत्॥२१॥ इत्युपनयनं॥ श्रुतित्रयेदितिद्वंद्वे मैत्रहस्तेत्रयोत्तरे॥
भगोविधिद्वये मूले पूषभे सौम्यवासरे॥२२॥ द्विस्वभावे घटेलग्नेक
र्णवेधः शुभो भवेत्॥ चैत्रपौषौहरेः स्वापंवर्षेच युगुलंत्यजेत्॥२३॥
॥ ॥इतिकर्णवेधः॥ ॥पुनर्वसुद्वयंचित्राविशाखाभरणीद्वयं॥ मूल
मार्द्रामघाहेयाः श्रवणोदशमस्तथा॥२४॥ सोमशुक्रबुधानारीप्रसू
तिस्नानकर्मणि॥ हेयाप्रतिपदाषष्ठीनवमीचातिथिक्षयः॥२५॥ ॥
॥ ॥इतिस्त्रीप्रसूतिःस्नानं॥ ॥मूलादिद्वितयंग्राह्यंश्रवणाश्वमृगः
करः॥ जलवाप्यर्चने हेयाः शुक्रमंदार्कभूमिजाः॥२६॥ ॥इतिजल
वापी॥ ॥अनुराधाचतुष्केचमघादितिमृगेकरे॥ स्वातीश्रुतिवि
धिद्वंद्वेरेवत्यामुत्तरासुच॥२७॥ गोद्वयस्त्रीझषेकार्यो हलो हेयरा
निः कुजः॥ षष्ठीरिक्ताद्वादशीचद्वितीयाद्वयपर्वच॥२८॥ त्रिभिस्त्रि

भिस्त्रिभिः पंचत्रिभिः पंचत्रिकं द्वयं ॥ सूर्यभाद्दिनभं यावद्धानिर्ष्टद्विर्हे
लेक्रमात् ॥ २९ ॥ ॥ इतिहलप्रवाहः ॥ पूर्वाषाढादितिद्वंद्वे विधियु
ग्मंहरित्रये ॥ उत्तराफाल्गुनीहस्तत्रयंमूलंचरेवती ॥ ३० ॥ मैत्रा
श्विनीचलग्नोपि सिंहः कन्याघटोवृषः ॥ मिथुनंमकरोग्राह्योवा
स्तुकर्मणिकोविदैः ॥ ३१ ॥ श्रावणश्चाथवैशाखः कार्तिकः फाल्गु
नस्तथा ॥ मासेषुमार्गशीर्षश्चवास्तुकर्मणिशस्यते ॥ ३२ ॥ व
ज्रव्याघातशूलानिव्यतीपातातिगंडकौ ॥ विष्कंभः परिघोव
र्ज्योवारोभौमश्चभास्करः ॥ ३३ ॥ ॥ इतिवास्तुकर्म ॥ ॥ आर्द्रा
शतभिषाश्लेषाविशाखाभरणीद्वयं ॥ स्वाज्याचद्वादशीरिक्ता
षष्ठीचंद्रक्षयोष्टमी ॥ ३४ ॥ प्रतिपच्चतिथिर्वारोत्याज्योशनिकु
जोसदा ॥ पूर्तदेवप्रतिष्ठास्यात्स्थिरलग्नोत्तरायणे ॥ ॥ इतिदे

वालयवापीकूपतडागादिप्रतिष्ठा॥ ॥विशाखाभरणीपूर्वा हेयाश्लेषामघातथा॥ गृहप्रवेशेवैशाखोमार्गःपौषादिकास्त्रयः॥३६॥ज्येष्ठोग्राह्यःस्थिरोलग्नोग्राह्यःपक्षोबुधेःसितः॥ ॥इतिगृहप्रवेशः॥ अनुराधात्रयंहस्तोमृगश्चैवादितिद्वयं॥यात्रायांरेवतीशस्तानिधार्द्रीभरणीद्वयं॥३८॥ मघोत्तराविशाखाचसार्पश्चान्येचमध्यमाः॥ षष्ठीरिक्ताद्वादशीचपर्वाणिचविवर्जयेत्॥३९॥लग्नेकन्याममथश्चवृषभश्चतुलाधरः॥ यात्राचंद्रबलेकार्याशकुनंचविचारयेत्॥४०॥ शनौचंद्रेत्यजेत्पूर्वांदक्षिणांचदिशांगुरौ॥ सूर्येशुक्रेपश्चिमांचबुधेभौमेतथोत्तरां॥४१॥ ॥इतिदिक्शूलं॥ ॥पूर्वदिग्गमनेहस्तपुष्याश्विश्रवणामृगः॥सर्वसिद्धिकरःपुष्योविद्यायांचगुरुर्यथा॥४२॥ ॥इतिसर्वदिग्गमननक्षत्राणि॥ ॥प्रतिपत्सु

नवम्यांचपूर्वस्यांदिशियोगिनी॥अग्निकोणेतृतीयायामेकादश्यांचसास्मृ
ता॥४३॥त्रयोदश्यांचपंचम्यांदक्षिणायांदिशिस्थितिः॥द्वादश्यांचचतु
र्थ्यांचनिर्ऋतेःकोणगामिनी॥४४॥चतुर्दश्यांचषष्ठ्यांचपश्चिमायांच
योगिनी॥पौर्णिमायांचसप्तम्यांवायोःकोणेचपार्वती॥४५॥दशम्यां
१४ चद्वितीयायामुत्तरस्यांशिवाभवेत्॥ईशानकोणेचाष्टम्यांदर्शेचापिशि
वप्रिया॥४६॥योगिनीसुखदावामेपृष्ठेवांछितदायिनी॥दक्षिणेधन
हंत्रीचसन्मुखेमरणप्रदा॥४७॥ ॥इतियोगिनीचक्रं॥ ॥मासस्यप्रति
पच्छ्रेष्ठाद्वितीयाकार्यकारिणी॥आरोग्यदातृतीयाचचतुर्थीकलहप्र
दा॥४८॥पंचमीश्रीप्रदानित्यंषष्ठीचकलहप्रिया॥भक्ष्यपानसमायुक्ता १४
सप्तमीसुखदासदा॥४९॥अष्टमीव्याधिबहुलानवमीमरणप्रदा॥द
शमीकार्यसिध्येस्यादेकादश्यपिहेमदा॥५०॥द्वादशीप्राणसंदेहा

सर्वसिद्धात्रयोदशी॥ शुक्लावायदिवाकृष्णावर्जनीयाचतुर्दशी॥ ५१॥ पौ
र्णमास्याममायांवाप्रस्थानंनैवकारयेत्॥ तिथिक्षयोपिमासांतेग्रह
णांतेदिनत्रये॥५२॥ ॥इतितिथिफलं॥ ॥ अष्टसुप्रहरार्धेषुप्रथमा
द्येषुहर्निशं॥ पूर्वस्यांवामतोराहुस्तुर्यांतुर्यांदिशंव्रजेत्॥५३॥ ज
यायदक्षिणेराहुर्योगिनीवामतःशुभा॥ ८ ॥इतिराहुचक्रं॥ ॥चंद्र
ःश्चरतिपूर्वादिक्रमेणादिकुचतुष्टयं॥ मेषादिकेषुयात्रायांसंमुखश्चे
वशोभनः॥ ५४॥ ॥इतिचंद्रचक्रं॥ ॥यामयुग्मेन्चरौत्रोचवामेपूर्वा
दिगोरविः॥ यात्रास्मिन्दक्षिणेवामेप्रवेशःपृष्टकेद्वयं॥ ५५॥ इतिर
विचारः॥ ॥सूर्यभाद्दशमेषष्ठेतृर्येचांद्रेत्रयोदशे॥ विंशतोचरवे
र्योगषट्कंयोगस्यनायकं॥ ५५॥ इतिरवियोगः॥ मनुभानुदिशाः
सवोरसवेदाब्धिनःक्रमात्॥ रविवारान्मुहूर्तेयिंकुलिकोनिंदि

तः शुभे॥५६॥ ॥इतिमुहूर्तकुलिकेः॥ गतानाड्यो द्विगुणिताः पं
चभिश्च विभाजिताः॥ सूर्यशुक्रे बुधाश्चंद्रो मंदजीवे कुजाः क्रमात्॥
॥५७॥ इतिमुहूर्तदेवता ॥तिथिवारं च नक्षत्रं एकीकृत्य समं
न्वितं॥ द्वित्रिश्चतुर्भिर्गुणितं रससप्ताष्टभाजितं॥५८॥ आ
१५ दिशून्ये भवेद्धानि मेध्यशून्ये रिपोर्भयं॥ अंत्यशून्ये भवेन्मृत्युः
सर्वांके विजयी भवेत्॥५९॥ इतिसर्वांकियोगः॥ ॥राशिप्र
वाहे गमनादिशास्तं सूर्यप्रवाहेन हि किंचनोपि॥ प्रष्ठर्जयः स्या
ग्रहमानभागे रिक्ते च भागे विफलं समस्तं॥६०॥ इतियात्रा॥ १५
दक्षिणेकुः स्वदः शुक्रः सन्मुखे हंति लोचनं॥ वामपृष्ठे शुभो
नित्यं रोधयेदस्तगं शुभं॥६१॥ ॥इतिशुक्रदोषः॥ ॥विद्यारं
भे गुरुः श्रेष्ठो मध्यमौ रविभार्गवौ॥ जतन्यासो बुधे चंद्रे जा

अंमृत्युःकुजेशनौ॥ ॥इतिविद्यारंभः॥ ॥पुष्योभाद्रपदायुग्मं
स्वातीचश्रवणाश्विनी॥हस्तोत्तरामृगोमैत्रंतथाश्लेषाचरेवती
॥६३॥आद्यानिभानिचैतानिक्रयविक्रयणेबुधैः॥चंद्रभार्गव
जीवाश्ववाराःशकुनमुत्तमं॥६४॥ ॥इतिक्रयविक्रयः॥ ॥ह
स्तादिपंचपूर्वाश्चधनिष्ठासुचकांचनं॥रक्तंपरिदधेद्वस्त्रंभौमा
र्कगुरुभार्गवे॥६५॥ ॥इतिरक्तवस्त्रसुवर्णादिपरिधानं॥ ॥
धनिष्ठापंचकंत्याज्यंतृणधान्यादिसंग्रहे॥त्याज्यादक्षिणदि
ग्यात्रागृहाणांछादनंतथा॥६६॥ ॥इतिपंचकं॥ ॥तैलाभ्यं
गेरवौतापःसोमेशोभाकुजेमृतिः॥बुधेधनंगुरोहानिःशुक्रे
दुःखंशनौसुखं॥६७॥ ॥इत्यभ्यंगः॥ ॥हस्तत्रयेब्रह्मयु

33

गेमघायांपुष्येधनिष्ठाश्रवणोत्तरासु॥ मृगानुराधाहयरेवतीषुस्थिरे
षुलग्नेषुवधूप्रवेशः॥६८॥ ॥इतिवधूप्रवेशः॥ ॥आ[illegible]षाद्दित
यंस्वातीरोहिणीचपुनर्वसुः॥रोगीस्नानेरेवतीचवर्जयेदुत्तरात्रयं
॥६९॥रिक्तातिथौचरेलग्नेवारेचरविभौमयोः॥स्नानंचरोगिणा
१६ मुक्तंद्विजभोजनसंयुतं॥७०॥ ॥इतिरोगीस्नानं॥ ॥आनंदःका
लदंडश्चधूम्राख्योथप्रजापतिः॥सो[illegible]ध्वांक्षोध्वजश्चापिश्रीवत्सो
वज्रमुद्गरौ॥७१॥ छत्रंमैत्रंमानसाख्यंपद्माख्योलंबकस्तथा॥उ
त्पातमृत्युकाणाश्चसिद्धिश्चाथशुभोमृतं॥७२॥मुसलोगदमातं १६
गोराक्षसश्चचरःस्थिरः॥ वर्धमानश्चविज्ञेयाअष्टाविंशतिरित्यमी॥
॥७३॥ फलेस्वनामसदृशायोगाद्दैवज्ञभाषिताः॥अश्विनीरवि
वारेचयोगोह्यानंदसंज्ञकः॥७४॥ मृगशीर्षंशीतरश्मावश्लेषा

क्षितिनंदने॥ बुधेहस्तोनुराधाचदेवराजपुरोहिते॥७५॥ भार्गवेचोत्तराषाढाशनौशतभिषायदा॥ तदाऽनंदादियोगःस्यात्कालदंडादयःक्रमात्॥ ॥इत्यानंदादियोगाः॥ ॥एतेराजमुहूर्ताःसर्वदाविचिंतनीयाः॥

सू	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	अ	२२	२३	२४	२५	२६	०
चं	मृ	आ	पु	पु	आ	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो
मं	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	अ	२२	२३	२४	२५	२६	रे	१	२	३	४	५	६	७	८पु
बु	ह	चि	स्वा	१६	अ	ज्ये	मू	पू	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पु	आ	म	पू	उ१२
गु	अ	ज्ये	१९	२०	२१	अ	२२	२३	श	२५	२६	०	अ	भ	कृ	४	५	६	७	पु	९	१०	११	१२	१३	१४	१५	१६
शु	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पु	आ	म	पु	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू२
श	श	पू	उ	०	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	ज्ये	१९	२०	२१	अ	२२	२३ ध
	आ- नंद	का ल दंड	धू म्र	प्र जा पति	सौ म्य	ध्वां क्ष	ध्व ज	श्री व त्स	व ज्र	मु द्ग र	छ त्र	मि त्र	मा न स	प द्म	लुं ब क	उ त्पा त	मृ त्यु	का ण	सि द्धी	शु भ	मृ ति	मु स ल	ग द	मा तं ग	रा क्ष स	च र	स्थि र	व र्ध मान

२८

हस्तः सूर्ये मृगः सोमे वारे भोमे तथाश्विनी ॥ बुधे मैत्रा गुरुः पुष्ये रेवती मृगु
नंदने ॥७७॥ रोहिणी सूर्यपुत्रे च सर्वसिद्धिप्रदायकः ॥ असावमृतसिद्धि
श्च योग प्रोक्तः पुरातनैः ॥७८॥ ॥इत्यमृतसिद्धियोगः॥ ॥विशाखादि
१७ चतुष्केषु सूर्यवारक्रमेण च ॥ उत्पातमृत्युकाणाश्च सिद्धिश्चाइत्तितोभ
वेत् ॥७९॥ ॥इत्युत्पातमृत्युकाणसिद्धियोगः॥ तिथ्यंकेन समायु
क्तो वारांको यदि जायते ॥ त्रयोदशा क्रकचक्रो योगो निंद्यः सदा शुभे ॥८०॥
॥ ॥इति क्रकचयोगः॥ ॥मघा सूर्ये विशाखेंदौ भौमे चार्द्रानलो गुरौ ॥
बुधे मूलं विधिः शुक्रे यमघंटः शनौ करः ॥८१॥ ॥इति यमघंटः॥ ॥ १७
भौमार्कवारयोर्नंदा भद्रा जीवशशांकयोः ॥ बुधे जया भृगौ रिक्ता शनौ
पूर्णा च मृत्युदा ॥८२॥ इति मृत्युयोगः ॥ शुक्रे नंदा बुधे भद्रा मंदे रिक्ता
कुजे जया ॥ गुरौ पूर्णा खिलारंभे सर्वकार्येषु सिद्धिदा ॥ ॥सिद्धियोगः॥

अंधाक्षश्चिपिटाक्षश्चकाणाक्षो दिव्यलोचनः॥ गणयेद्रोहिणीपूर्वंस
प्तवाराननुक्रमात्॥८४॥ पुनर्वसुर्मृगश्चार्द्राज्येष्ठामैत्रकरस्तथा॥
पूर्वाषाढोत्तराषाढामूलं दक्षिणचारिणः॥८५॥ अश्विनीभरणी
स्वाती विशाखाफल्गुनिद्वयं॥ मघाभाद्रपदायुग्मं नवचोत्तरचा
रिणः॥८६॥ कृत्तिकारोहिणीपुष्यं चित्राश्लेषाचरेवती॥ शतंध
निष्ठाश्रवणो नवमध्यमचारिणः॥८७॥ अमतीद्दिशो वत्सो मासा
नां च त्रिकं त्रिकं॥ आदौ भाद्रपदं कृत्वा सव्यतो दिक्चतुष्टयं॥८८॥ या
त्राविवादं संबंधं द्वारं च गृहहर्म्ययोः॥ भूपतेर्मिलनं युद्धं वत्सस्या
भिमुखं त्यजेत्॥८९॥ ॥ त्रयं यमे श्वे चाग्नौ बहू विधोः पंच मृगे
त्रयं॥ एकमार्द्रासु नक्षत्रं चत्वारि च पुनर्वसौ॥९०॥ पुष्ये त्रयं रसाः
सर्पे मघायां भानि पंच च॥ द्वयं द्वयं च फाल्गुन्योर्त्रयं हस्तेषु पंच च॥९१॥

चित्रास्वात्योरेकमेकंचतुष्कंचद्विदैवते॥ त्रयंस्यादनुराधायांज्येष्ठायांच
त्रयंस्मृतं॥२२॥ मूळेज्ञेयंचतुष्कंचपूर्वाषाढेतथोत्तरे॥ त्रयंचाभिजिति
त्रोक्तंश्रवणेचत्रयंतथा॥२३॥ धनिष्ठायांचचत्वारिशतभिषासुचद्व
यं॥ द्वयंभाद्रपदेचैवद्वात्रिंदशेपिचांतिमे॥२४॥ ॥इतिनक्षत्रतारा
संज्ञा॥ ॥लग्नेष्टमेव्ययेसूर्येक्षेत्रपालस्यदूषणं॥ आकाशदेव्याश्चं
द्रेचलग्नेषष्ठेष्टमेव्यये॥२५॥ द्वादशेदशमेभौमेशाकिन्यादूषणं
स्मृतं॥ वनदेवीभवोदोषःसप्तमेद्वादशेबुधः॥२६॥ जामित्रेद्वाद
शेजीवेदेवदोषोहिविद्यते॥ अस्तेव्ययेदैसपूज्येजलदेव्याश्चदू
षणं॥२७॥ शनैश्चरेव्ययेचास्तेदोषःस्याद्दामवातजः॥ जामि
त्रेद्वादशेराहोकुगतिर्ज्ञातिदूषणं॥२८॥ पित्तदोषोभवेन्मेषेक्षु
धाहानिर्विवर्णता॥ वृषेगगनदेव्याश्चज्वरकुस्वप्ननेत्ररुक्॥२९॥

मिथुने च महामायादोषो वेलाज्वरो निळः॥ कर्के च शाकिनी दो
षो हास्यरोदनमौनता॥ २००॥ सिंहे जलप्रेतदोषो दिवाशीत
ज्वरो रुचिः॥ ग्रहदोषश्च कन्यायां क्रोधालस्यारुचिर्व्यथा॥ १॥
क्षेत्रपालभवो दोषो तुले संतानपीडनं॥ वृश्चिके नागदोषश्च
ज्वालादेहे कुबुद्धिता॥ २॥ चापे देवभवो दोषो ज्वरश्शोकोदरव्य
था॥ मकरे चंडिकादोषो देहभंगाज्वरो।नळः॥ ३॥ मलिन
प्रेतदोषस्तु कुंभे देहस्यपीडनं॥ मीने च योगिनीदोषो ज्वरो
जाज्वल्यदर्शनं॥ व्यये धर्मे तृतीये च षष्ठे पापग्रहो यदि॥
हतो गरे जले शस्त्रे तस्य दोषः कुलोद्भवः॥ ५॥ शनौ जले
कुजे शस्त्रे गरे सूर्येस्वर्वं राज्ञः॥ राहो च विकृतो नष्टः

शांतिपूजाद्विजार्चनैः ॥ ६ ॥ स्वक्षेत्रे गोत्रदोषश्च परक्षेत्रे परो
द्भवः ॥ शत्रुक्षेत्रे शत्रुदोषो मित्रे स्वजनसंभवः ॥ ७ ॥ ॥ इति
रोगदोषज्ञानं ॥ ॥ चरं चलं स्मृतं स्वाती पुनर्वसु श्रुतित्रयं ॥
क्रूरमुग्रं मघा पूर्वात्रितीयाभरणी तथा ॥ ८ ॥ ध्रुवं स्थिरं च
निर्दिष्टं रोहिणी चोत्तरात्रयं ॥ तीक्ष्णं दारुणमश्लेषाज्ये
ष्ठार्द्रा मूळमेव च ॥ ९ ॥ लघु क्षिप्रं स्मृतं पुष्यो हस्तोश्विन्यभि
जित्तथा ॥ मृदुमैत्रं स्मृतं चित्रानुराधारेवती मृगः ॥ १० ॥
मिश्रं साधारणं प्रोक्तं विशाखा कृत्तिका तथा ॥ नक्षत्रेष्वेषु
कर्माणि नामतुल्यानि कारयेत् ॥ ११ ॥ ॥ इति नक्षत्रसं
ज्ञा ॥ ॥ नराकारं लिखेच्चक्रं मृक्षे यत्र शनिर्भवेत् ॥ तन्नक्ष

त्रंमुखेदत्वायावन्नामनरस्यच॥ १२॥ तावद्विचारयेत्तत्र त्रेयंचाथशु
भाशुभं॥ एकंमुखेचनक्षत्रंचत्वारिदक्षिणेकरे॥ १३॥ त्रयंत्रयंपा
दयोश्ववामहस्तेचतुष्टयं॥ हृदिपंचत्रयोमौलौनेत्रेगुह्येद्वयंद्वयं
॥ १४॥ हानिरास्येदक्षहस्तेलाभोवामेचरोगिता॥ हृदिश्रीर्म
स्तकेराज्यंपादेपर्यटनंसदा॥ १५॥ नेत्रेसुखंगुदेमृत्युःशनिच



क्रेविचारयेत्॥ जपपूजाद्विजार्चाभिःकल्याणंजा
यतेसदा॥ १६॥ ॥इतिशनिचक्रं॥ ॥मेषेशनिर्गु
र्जरेषुप्रभासेचार्बुदेवृषे॥ मिथुनेजायतेपीडा
स्थलीमूलस्थलेषुच॥ १७॥ कर्केकाश्मीरके
बाधाशाक्रप्रस्थेमृगाधिपे॥ शनैश्चरेचकन्यायां

मालवायांतिसंक्षयं॥१८॥तुलावृश्चिकचापेषुयदियातिशनैश्चरः॥
नवर्षतितदामेघाः पृथ्वीदुर्भिक्षपीडिता॥१९॥सुभिक्षंमकरेकुंभे
जायतेबहुधाशनौ॥मीनेचसर्वलोकानांदुर्भिक्षेणक्षयोभवेत्
॥२०॥ ॥इतिशनैश्चारः॥ ॥यत्रमासेरवेर्वाराजायंतेपंचसंत
तं॥दुर्भिक्षंक्षेत्रभंगश्चतत्रास्तेचमहाभयं॥२१॥सोमस्यपंचवा
राश्चयत्रमासेभवंतिच॥धनधान्यसमृद्धिश्चसुखंभवतिसर्वदा
॥२२॥यत्रमासेमंगलस्यजायंतेपंचवासराः॥रक्तेनपूरितापृथ्वी
छत्रभंगस्तदाभवेत्॥२३॥बुधस्यपंचवाराःस्युर्यत्रमासेनिरंतरं॥
प्रजानांसुखमत्यंतंसुभिक्षंचप्रजायते॥२४॥यत्रमासेपंचवाराजा
यंतेचबृहस्पतेः॥विग्रहःपश्चिमेदेशेखड्गयुद्धंचजायते॥२५॥शु
क्रस्यपंचवाराःस्युर्यत्रमासेनिरंतरं॥प्रजावृद्धिसुभिक्षंचसुखंतत्र

प्रवर्तते॥२६॥ शनेश्चपंचकेदृष्ट्वापातालेकंपतेफणिः॥ ईशान्येदेश
भंगश्चवक्रिदाहोमहर्घता॥ २७॥ ॥ इत्येकमासेपंचवारफलं॥ ॥
अंगुल्योविंशतिःसूर्येशंकुःसोमेचषोडश॥ कुजेपंचदशांगुल्योबुध
वारेचतुर्दश॥ २८॥ त्रयोदशगुरोर्वारेद्वादशार्कजशुक्रयोः॥
शंकुमूलेयदाछायामध्याह्नेचप्रजायते॥ २९॥ तदाचाभिजिदाख्या
तंघटिकैकास्मृताबुधैः॥ अत्रकार्याणिसर्वाणिसिद्धिंयांतिकृता
निच॥ ३०॥ जातोभिजितिराजास्याद्व्यापारेसिद्धिरुत्तमा॥ ॥इ
त्यभिजिन्मुहूर्तफलं॥ ॥ अर्घवृद्धिःफाल्गुनेस्याच्चैत्रेचैवापदस्त
था॥ ३१॥ वैशाखेविग्रहोराजाज्येष्ठेवृष्टिश्चभूयसी॥ आषाढेचो
दितेशुक्रेजलंभवतिदुर्लभं॥ श्रावणेचपशोःपीडाभाद्रेधान्य

समृद्धयः॥२३॥आश्विनेसर्वसंपत्तिःशुभंकार्तीकमार्गयोः॥
पोषेमाघेछत्रभंगोयद्युदेतिभृगोःसुतः॥२४॥ इतिशुक्रोदयफ
लं॥ ॥पूर्ववायोहोलिकायांप्रजाभूपालयोःसुखं॥पलाय
नंचदुर्भिक्षंदक्षिणेजायतेध्रुवं॥२५॥पश्चिमेतृणसंपत्तिरुत्तरेधा
न्यसंभवः॥यदिरवेचत्रिखावृष्टिर्दुर्गेराज्यंचसंक्षयेत्॥२६॥
॥ ॥इतिहोलिकाफलं॥ ॥एकादश्यांकार्तिकस्ययदिमेघः
समीक्ष्यते॥आषाढेस्यात्तदावृष्टिःश्रावणेचापिजायते॥२७॥
कृष्णपक्षेदशम्यांचवृष्टिःपोषस्यजायते॥तदाभाद्रपदेमासेह
ष्टिर्भवतिभूयसी॥२८॥वृश्चिकेमार्गसप्तम्यांज्येष्ठेमूलेनवर्ष
ति॥ नक्षत्रैर्वारिवाहस्तुतदान्नैःपूर्यतेमही॥२९॥पंचम्यांप्रथ

मेपक्षेश्रावणस्यचवर्षति ॥ पयोवाहस्तदाधान्यैर्धराव्याप्ताज
लेरपि ॥ ४० ॥ आषाढेपौर्णमास्यांयन्नक्षत्रंतद्विचारयेत् ॥ पूर्वा
षाढेसुभिक्षंस्यान्मूलेदुर्भिक्षमुच्यके ॥ ४१ ॥ उत्तराषाढकेश्वानां
पीडाकटकिनांगतिः ॥ ज्येष्ठस्यप्रथमेपक्षेमासादौचयदाभवे
त् ॥ ४२ ॥ रविवारस्तदावायुर्नीतिवृक्षांतकारकः ॥ अत्यंतवि
ग्रहाभौमेबुधेदुर्भिक्षमुच्यके ॥ ४३ ॥ अनावृष्टिःशनीवारेज
लंक्कापिनलभ्यते ॥ सोमशुक्रसुरेज्यानांयदिवारःप्रजायते ॥
॥ ४४ ॥ धनधान्यसुतोसत्तिर्गेहेगेहेमहोत्सवः ॥ पोषमासस्य
संक्रांतौरवेर्वारोयदाभवेत् ॥ ४५ ॥ सुराचार्येचसोमेचमूल्य
मर्द्धंसुनिश्चितं ॥ मीनसंक्रमणेसूर्यवारेवातिसमीरणः ॥ ४६ ॥

45

भौमेपीडापशूनांचदुर्भिक्षंचशनैश्वरे॥ संक्रांतिःसोम्यवारेचप्रजानां
परमंसुखं॥४७॥ भानुभौमार्किवारेषुप्राणियुद्धंमहर्घता॥ छत्र
भंगोमहामारीरोदनंभयजिघ्नता॥४८॥ संक्रांत्यधरनक्षत्रादा
२२ त्मभावधिगण्यते॥ त्रिकंषट्कं त्रिकंषट्कं त्रिकंषट्कंपुनःपुनः॥ प
थाभोगोव्यथावस्त्रंहानिश्चविपुलंधनं॥ षट्कभागेफलंषट्कमा
सिमासिविचारयेत्॥५०॥ ॥इतिसंक्रांतिफलं॥ ॥राशिच
क्रंलिखित्वादौमेषसंक्रांतिभादिकं॥ अष्टाविंशतिकंतत्रलि
खेन्नक्षत्रमंडलं॥५१॥ सिंधोर्द्वयंद्वयंदद्यादन्यत्रैकैकमेवच॥ च २२
त्वारःसागरास्तत्रसंधयश्चाष्टसंख्यया॥५२॥ श्रृंगाणितत्रचत्वा
रितदान्यष्टौस्मृतानिच॥ रोहिणीपतितायत्रतत्रज्ञेयंशुभाशु
भं॥५३॥ यतोजलमयस्यैषाचंद्रस्यपरमप्रिया॥ समुद्रेषुमहा

वृष्टिस्तटे दृष्टिश्च शोभना ॥५४॥ पर्वतो बिंदुमात्रस्य खंडदृष्टिश्च सं
धिषु ॥ ॥इति रोहिणीफलं ॥ ॥ नराकारं लिखेच्चक्रं सूर्यो यत्र
व्यव स्थितः तन्नक्षत्रादिकं कृत्वा त्रयं दद्याच्च म
स्तको ॥५५॥ मुखे त्रयं स्कंधयोश्च दद्या
देकैक मेव च ॥ हस्तद्वये तथैकैकं जा
न्वोरप्येक मेकु कं॥ ॥५६॥ हृदि पंच गुदे चैकं नाभौ चै
कं प्रदापयेत् ॥ जंघ योरेकमेकं च षडाहः पादयोर्द्वयोः
॥५७॥ मस्तके पट्टबं धीस्यान्मुखे मिष्टान्नभोजनः ॥
स्कंधयोर्गजगामी स्याद्बाह्वोस्थानाच्युतो भवेत् ॥५८॥ पा
णौ च जायते चोरो हृदये च नरेश्वरः ॥ स्वल्पतोषी भवेन्नाभौ



परद्वाररतो गुदे ॥ ५९ ॥ जंघयोः परदेशी स्यादल्पायुश्च पदद्वये ॥
चक्रे च सूर्यनक्षत्राज्जन्मभावधि गण्यते ॥ ६० ॥ ॥ इति नरच
२३ क्रं ॥ ॥ ग्रामो यत्र भवेद्वृक्षे न दद्यात्सप्त मस्तके ॥ पृष्ठे सप्त हृदि ज्ञे
याः सप्त पादे च तारकाः ॥ ६१ ॥ मस्तके च धनी मान्यः पृष्ठे हीन
श्च निर्धनः ॥ हृदये सुख संपत्तिः पादे पर्यटने फलं ॥ ६२ ॥ ॥ इति
ग्रामवासफलं ॥ ॥ मूले ह्यो मूल वृक्षस्य घटिकाः परिकीर्ति
ताः ॥ स्तंबे षड ऊर्घंटिकास्त्वचि चैकादशः स्मृताः ॥ ६३ ॥ मूले नाशो
हि मूलस्य स्तंबे हानिर्धनक्षयः ॥ त्वचि भ्रातुर्विनाशाय शाखायां मा २३
त्रपीडनं ॥ ६४ ॥ परिवारक्षयः पत्रे पुष्पे मंत्री च भूपतेः ॥ फले राजा शि
खायां स्यादल्पजीवी च बालकः ॥ ६५ ॥ ॥ इति मूलफलं ॥ ॥ रेव

त्यादिमृगांतेच यावत्तिष्ठति चंद्रमाः॥ शुक्रस्तावद्भवेद्वंधः संमुखे
दक्षिणे पिवा॥६६॥ प्राक्पश्चादुदितः शुक्रः पंच सप्त दिनं शिशुः॥
विपरीतं तु वृद्धत्वं तद्वदेव गुरोरपि॥६७॥ तृतीये दशमे षष्ठे सदा
सूर्यः शुभावहः॥ प्रथमे दशमे षष्ठे तृतीये सप्तमे शशी॥६८॥
शुक्लपक्षे द्वितीयश्च पंचमो नवमः शुभः॥ ताराश्शुभप्रदाः सर्वाः
स्त्रिपंचसप्तवर्जिताः॥६९॥ यदि स्यात्सबलश्चंद्रस्तदा पिङ्ले शादा
यिनी॥ तृतीया पंचमी तारा सप्तमी चन्द्रणं भवेत्॥७०॥ जन्मसं
पद्विपत्क्षेमप्रत्यरिः साधको वधः॥ मैत्रातिमैत्रास्ताराः स्युस्त्रिरा
वृत्सा न वैवहि॥७१॥ त्रिषष्ठदशमे भौमो राहुः केतुः शनिः शु
भः॥ षष्ठेष्टमे द्वितीये च चतुर्थे दशमे बुधः॥ द्वितीये पंचमे जीवः

सप्तमेनवमेशुभः॥ विहायशुक्रोदशमंषष्ठंचसप्तमंशुभः॥७३॥ए
कादशेग्रहाः सर्वेसर्वकार्येषुशोभनाः॥ ग्रहाणांगोचरेज्ञेयंफलंविज्ञैः
शुभाशुभं॥७४॥ ॥इतिगोचरफले॥ ॥दशाम्यवधिकृष्णेतुपक्षेपूर्णे
हिचंद्रमाः॥ ततःपरंक्षीणचंद्रेशुभंकर्मविवर्जयेत्॥७५॥ पुनर्वसुद्व
यंक्षौरेश्रुतित्रयकरत्रयं॥ रेवतीद्वितयंज्येष्ठामृगशीर्षंचगृह्यते॥
॥७६॥ क्षौरेप्राणहरीस्याज्यामघामैत्रंचरोहिणी॥ उत्तराकृत्तिकावा
राभानुभौमशनैश्चराः॥७७॥ रिक्ताहेयाष्टमीषष्ठीक्षौरेचंद्रक्ष
योनिशा॥ संध्याविष्ट्याप्तगंडांतभोजनांताश्चगोगृहं॥७८॥
॥ ॥इतिनित्यक्षौरं॥ ॥रेवतीद्वितयंपुष्येरोहिण्यांमृगमैत्रयोः॥
श्रवणोत्तरशुक्रेषुराज्ञांस्यादभिषेचनं॥७९॥ ॥इतिराजाभिषे
कः॥ ॥रेवतीयुगुलंज्येष्ठामैत्रंहस्तत्रयंमृगः॥ पुनर्वसुश्चविज्ञे

योगणस्तिर्यङ्मुखोबुधैः॥८०॥बीजारोपंचवाणिज्यंसर्वसिद्धिंचका
रयेत्॥वाहनानिचयंत्राणिगमनंचविधीयते॥८१॥पूर्वात्रयंमघाश्ले
षाविशाखाकृत्तिकायमः॥मूलंचाधोमुखोज्ञेयोनवकोयंगणोबु
धैः॥८२॥भूकार्यमग्निकार्यंचखननंविवरस्यच॥युद्धंचाधोमु
खेयच्चतत्कार्यंकारयेद्बुधः॥८३॥उत्तरात्रितयंपुष्योरोहिण्यार्द्रा
श्रुतित्रयं॥ऊर्ध्ववक्त्रोगणोज्ञेयोनक्षत्राणांमनीषिभिः॥८४॥प्रा
सादछत्रगेहानिप्राकारध्वजतोरणं॥राज्याभिषेचनंचैवकुर्या
दूर्ध्वमुखेगणे॥८५॥ ॥इतिनक्षत्रेषुकार्याकार्यविचारः॥
॥ ॥पुनर्वसुद्वयंपूषामृगश्चैवकरद्वयं॥मूलंश्रुतित्रयंमैत्रंभि
षक्कर्मपिगृह्यते॥८६॥सोमश्शुक्रसुरेज्यानांवाराःशकुनमुत्त

KKSU LIBRARY
RAMTEK
441 106
M-1646
Dist Nagpur

मे॥लग्नेषु चापमीनौ च वृषौ ग्राह्यस्तुलाधरः॥८७॥ ॥इति भै
षज्यं कर्म॥ ॥अमावास्याष्टमी त्याज्या पौर्णिमा च चतुर्दशी॥रविवा
रो वर्जनीयो गोपशूनां विनिर्गमे॥८८॥ चित्रोत्तरा रोहिणी च श्र
वणोपि विवर्जितः॥ मूलेषु पशुजातीनां अशुभो निर्गमो भवे
त्॥८९॥ ॥इति पशुनिर्गमः॥ ॥उत्तरासु विशाखायां रोहि
ण्यां च पुनर्वसौ॥ नवम्यां च चतुर्दश्यां मष्टम्यां नानयेत्पशून्॥
॥९०॥ ॥इति पशुप्रवेशः॥ ॥पूर्वा मैत्रत्रयं मूलं वासरो रेव
तीकरः॥ पुनर्वसुद्वयं ग्राह्यं पशूनां क्रयविक्रये॥९१॥ ॥इति
पशूनां क्रयविक्रयः॥ ॥नंदातिथौ नवम्यादौ पूर्णायां च तथां
तिके॥ घटिके काशुभे त्याज्या तिथिगंडोयमुच्यते॥९२॥ज्ये

घाश्लेषारेवतीनामंते च घटिकाद्वयं॥ आद्ये मूलमघाश्विनानां भगंडो घटिकाद्वयं॥९३॥ मीनवृश्चिककर्कांते घटिकार्द्धं परित्यजेत्॥ आद्ये मेषस्य चापस्य सिंहस्य घटिकार्द्धकं॥ ९४॥ तिथिगंडे भगंडे च लग्नगंडे च जातकः॥ न जीवति तदा याते जीविते च धनी भवेत्॥९५॥ ॥इति गंडांतफलं॥ ॥विष्कंभः प्रीतिरायुष्मान्सौभाग्यः शोभनस्तथा॥ अतिगंडः सुकर्मा च धृतिः शूलस्तथैव च॥९६॥ गंडो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा॥ वज्रः सिद्धिर्व्यतीपातो वरीयान्परिघः शिवः॥ सिद्धिः साध्यः शुभः शुक्लो ब्रह्मा ऐंद्रोथ वैधृतिः॥ सप्तविंशतिराख्याता नामतुल्यफला अमी॥ ९८॥ ॥इति योगाः॥ ॥

53

बवश्चवालवश्चैवकौलवस्तैतिलस्तथा॥गरश्चवणिजोविष्टिः
सप्तैतानिचराणिच॥९९॥कृष्णपक्षेचतुर्दश्यांशकुनिःपश्चिमेद
ले॥चतुःपाद्श्चनागःस्यादमावास्यादलद्वये॥३००॥शुक्लप्रतिप
२६ दायाश्चकिंस्तुघ्नःप्रथमेदले॥स्थिराण्येतानिचत्वारिकरणानिजगु
र्बुधाः॥१॥शुक्लप्रतिपदांतेचबवाख्यःकरणोभवेत्॥एकादशेव
ज्ञेयानिचरस्थिरविभागतः॥२॥ ॥इतिकरणविचारः॥ ॥दस्रोय
मोऽनलोधाताचंद्रोरुद्रोदितिर्गुरुः॥भुजंगमश्चापितरोभगार्यमदिवा
करः॥३॥त्वष्टावायुःशक्रवह्निर्मित्रःशक्रश्चनिर्ऋतिः॥जलंविश्वेवि २६
धिर्विष्णुर्वासवोवरुणस्तथा॥४॥अजैकपादहिर्बुध्न्यःपूषांतिकमिना
बुधैः॥अष्टाविंशतिसंख्यानांनक्षत्राणामधीश्वराः॥३०५॥ ॥इति

नक्षत्राधिपतिविचारः॥ ॥इतिश्रीकाशिराजविरचितेशीघ्रबोधेमु
हूर्तप्रकरणंसमाप्तं॥ ॥शिरोमुखेकर्णनेत्रंस्पृष्ट्वापृच्छतिचेज्जनः॥
सुवर्णधनधान्यानांलाभस्तस्यनसंशयः॥१॥स्कंधग्रीवाकंठहस्तस्प
र्शेलाभोहिदुःखतः॥कुक्षिनाभिसमालंभेभक्ष्यपानादिसिध्यति॥२॥
जंघालिंगकटिस्पर्शेकन्यालाभःसुतोद्भवः॥जानुगुल्फपदस्पर्शेम
हाक्लेशःप्रजायते॥ ॥केशस्पर्शेभवेन्मृत्युःफलादिस्पर्शनेशुभं॥ तृणां
गारकसंस्पर्शेकार्यसिद्धिर्नजायते॥४॥काष्ठपंकपटस्पर्शेग्रहपीडाम
नोभये॥मृगरामोन्नभांडादिस्पर्शेसिद्धिःप्रजायते॥५॥शून्यालये
श्मशानेचशुष्ककाष्ठेक्षतेनरो॥गुल्मभस्माधमस्थानेप्रश्नेक्लेशःप्र
जायते॥६॥देवगेहतटाकादिव्यवस्थानेशुभंभवेत्॥सुखंदिक्षुस्थि

तोसिद्धिर्विदिक्षुचनजायते॥७॥ इस्संगविद्या॥ तिस्त्रोमीनेचमेषेच
पंचचत्वारिसत्पलाः॥ ततस्त्रश्चवृषेकुंभेपलाःप्रोक्ताश्चषोडश॥ ८॥
मकरेमिथुनेपंचघटिकाविशिखाःपलाः॥ पंचकर्केचचापेचशि
२८ ववेदाःपलाःस्मृताः॥९॥ घटिकाःपंचसिंहेलौद्वयंवेदाःपलाः
स्मृताः॥ कन्यायांचतुलेपंचपलाश्चंद्रस्तथाग्नयः॥१०॥ ॥इ
तिलग्नप्रकरणं॥ ॥सूर्येधेनुश्चताम्रंचगोधूमारक्तचंदनं॥
चंद्रेशंखंचंदनंचरौप्यंवस्त्रंचतंदुलं॥ कुजेवृषःप्रदातव्योरक्त
वस्त्रंगुडोदनं॥११॥ बुधेकर्पूरकोमुद्गाहरिद्वस्त्रंहरिन्मणिः॥ १२॥
पीतवस्त्रद्वयंजीवेहरिद्राचणकस्तथा॥ अश्वःशुक्रेसितोदे २७
यःशुक्लधान्यानिचांबरं॥१२॥ शनौतैलंतिलादेयाःकृष्णा

४वृषेगुरौस्वल्पदृष्टिः प्रजानाशश्चयुग्मके॥ कर्केगुरौमहादृष्टिः सिंहेजीवेसुभिक्षकं॥ गोलौहमुत्तमं॥ राहोचमहिषीछागो माषाश्चतिलसर्षपाः॥१४॥ अजमेषौचदातव्यौकेतौचान्नंचमिश्रितं॥ स्वर्णगोविप्रपूजाभिः सर्वेषांशांतिरुत्तमा॥१५॥ ॥इतिग्रहदानानि॥ ॥मेषेगुरौसुभिक्षंचसुदृष्टिश्चप्रजासुखं॥ कन्यागुरौरोगपीडा दुर्भिक्षंसस्यजन्मच॥१६॥ तुलेगुरौस्वल्पसस्यंबहुक्षीरंप्रजारुजः॥ अलौजीवेच दुर्भिक्षंराजचोरोरगाद्भयं॥१७॥ चापेगुरौशुभादृष्टिः शुभंसस्यंसुखीजनः॥ दुर्भिक्षंमकरेजीवेराजयुद्धंपशुक्षयः॥१८॥ कुंभेगुरौसुभिक्षंस्याद्धातुमूलमहर्घता॥ दुर्भिक्षंदक्षिणेदेशेनान्यदेशाझषेगुरौ॥१९॥ ॥इतिबृहस्पतिविचारः॥ ॥मार्गकार्तिकसंक्रांतौदृष्टिर्भवतिमध्यमा॥ पौषेमा

घेसुखंनृणांसस्यपूर्णावसुंधरा ॥ २० ॥ चैत्रफाल्गुनवैशाखज्येष्ठा
नांसंक्रमेघनः ॥ यदिवर्षतिसर्वत्रसुभिक्षंचप्रजासुखं ॥ २१ ॥ आषा
ढसंक्रमेवृष्टिर्व्याधिश्चश्रावणेसुखं ॥ भाद्रेचबहवोरोगाः शुभंस
र्वत्रचाश्विने ॥ २२ ॥ ॥ इतिसंक्रांतिवृष्टिफलं ॥ ॥ चैत्रस्यशुक्लपंच
म्यांपूर्ववायुर्धनागमः ॥ भाद्रेगुणत्रयंमूल्यंसस्यानांजायतेतदा
॥ २३ ॥ वैशाखशुक्लपंचम्यांदक्षिणेयदिमारुतः ॥ मेघगर्जस्त
दाभाद्रेसस्यानांजायतेतदा ॥ २४ ॥ ज्येष्ठस्यशुक्लपंचम्यांवृष्टिः
पश्चिममारुतः ॥ तदाचतुर्गुणंमूल्यंधान्यानांकार्तिकेभवेत् ॥
॥ २५ ॥ आषाढशुक्लपंचम्यांवृष्टिःपश्चिममारुतः ॥ तदाचतुर्गु
णंमूल्यंधान्यानांमार्गशीर्षके ॥ २६ ॥ श्रावणेशुक्लपंचम्यांवृष्टि
र्वीतोदिनद्वयं ॥ दक्षिणःपश्चिमोज्ञेयंदुर्भिक्षंधान्यसंक्षयः ॥ २७ ॥

॥ ॥इतिपंचमीफलं॥ ॥आषाढपौर्णिमायांचेदनिळोवातिनैर्ऋ
तौ॥ अनावृष्टिर्धान्यनाशोजलंकूपेनदृश्यते॥ २८ ॥ आषाढपौर्णि
मायांचेद्वायव्येयदिमारुतः॥ मशकामूषकाःकीटाजायंतेशल
भास्तथा॥ २९॥ आषाढपौर्णिमायांस्यादुत्तरेयदिमारुतः॥ध
र्मशीलस्तदालोकोधनंधान्यंगृहेगृहे॥ ३०॥ आषाढपौर्णिमा
यांचेदीशानेवातिमारुतः॥ सुखिनोहितदालोकागीतवाद्य
महोत्सवाः॥ ३१॥ वह्निकोणेवह्निभीतिःपश्चिमेचजलाद्भयं॥
अन्यत्रयदिवायुःस्यात्सुभिक्षंजायतेतदा॥ ३२॥ सर्वमासेपौ
र्णिमायांभूमिकंपोयदाभवेत्॥ उल्कातारावज्रपातःपरिधिः
शशिसूर्ययोः॥ ३३॥ धूमकेतुःशक्रचापंग्रहणंबकुधातथा॥
तदासकलवस्तूनांजायतेचमहर्घता॥ ३४॥ ॥इतिपौर्णिमा

फलं॥ ॥आषाढशुपक्षस्यद्वितीयायांनवर्षति॥ यदिमेघस्तदा
मेघःश्रावणेजायतेध्रुवं॥२५॥ तृतीयायांपूर्ववायुःपूर्वोयातिच
वारिदः॥ नचमेघास्तदाभाद्रेवर्षतिविपुलंजलं॥२६॥ चतुर्थ्यां
दक्षिणेवायुर्मेघःपूर्वांचगच्छति॥ आश्विनेचतदामासेवृष्टि
२९ र्भवतिनिश्चितं॥२७॥ चतुष्टयेचदिवसेयदिवर्षतिवारिदः॥
अतिवृष्टाचदुर्भिक्षंजायतेनात्रसंशयः॥२८॥ दिनद्वयंय
दावातोवातिदक्षिणपश्चिमे॥ तदानश्यंतिधान्यानिदुर्भिक्षं
चप्रजायते॥२९॥ तृतीयायांचपंचम्यांवायुःपूर्वोत्तरोयदि॥
तदाधान्यानिजायंतेसर्वंकृतयुगोपमं॥४०॥ ॥इत्याषाढ २९
शुक्लेद्वितीयादिदिनचतुष्टयफलं॥ ॥पोषेमूलभरण्यांतं
चंद्रचारेणौवर्षति॥४१॥ यदितिष्ठतिभोमस्वक्षेत्रेकोपिग्रह
१ गर्जति॥ आर्द्रादितोविशाखांतंसूर्यचारेण ४

स्तदा ॥४२॥ षण्मासंतुषधान्यानांजायतेचमहर्घता ॥ चंद्रेचदि
ननाथेचसर्वरोगोशुभंतदा ॥४३॥ शनौराहौसर्वधान्यंमहर्घं
राजविग्रहः ॥ बुधक्षेत्रेरवौचंद्रेविरोधःसर्वभूभुजां ॥४४॥ उ
त्पत्तिसप्तधान्यानांपंचमासेप्रजायते ॥ शुक्रक्षेत्रेबुधेभद्रंचं
द्रक्षेत्रेभृगोसुतः ॥४५॥ पाखंडानोभवेद्वृद्धिर्धान्यानांचमहर्घ
ता ॥ रविक्षेत्रेभृगोःपुत्रेपशूनांचमहर्घता ॥४६॥ बुधक्षेत्रे
शनौचंद्रेसप्तधान्यमहर्घता ॥ शुक्रक्षेत्रेगुरौभौमेःकार्पासा
दिमहर्घता ॥४७॥ भौमक्षेत्रेशनौराहौताम्रादीनांमहर्घता
॥ शनिक्षेत्रेशनौराहौसुभिक्षंचंद्रभास्करे ॥४८॥ पशूनांधा
न्यवृद्धिंचगुडादीनांमहर्घता ॥ गुरुक्षेत्रेशनौराहौपशुनाश
स्तृणक्षयः ॥४९॥ भौमेराज्ञांविरोधश्चबुधेवृष्टिश्चभूयसी ॥

भोमक्षेत्रेयदासंतिराहुभोमार्कभार्गवाः॥५०॥षण्मासंगुडकार्पा
सघृतक्षीरमहर्घता॥मंदक्षेत्रेयदासंतिमंदराहुबुधास्तदा॥५१॥
तदामुक्ताफलानांचशंखस्यचमहर्घता॥भोमक्षेत्रेभार्गवेचधा
२० न्यानांचमहर्घता॥५२॥शनिक्षेत्रेचंद्रसूर्येवस्त्राणांचमहर्घता
॥शुक्रभोमौगुरुक्षेत्रेप्रजापीडाप्रजायते॥५३॥ग्रहराशिसमा
योगेफलमेतत्प्रकीर्तितं॥ ॥इतिराशिग्रहयोगफलं॥ ॥चंद्रो
दयेकुजक्षेत्रेतुषधान्यस्यवृद्धयः॥चंद्रोदयेभृगुक्षेत्रेस्वल्पवृ
द्धिःप्रजायते॥प्रजापीडाबुधक्षेत्रेसोमशुक्रोदयोभवेत्॥५५॥र
विक्षेत्रेतुलावृद्धिःसौमक्षेत्रेभृगूदये॥चंद्रक्षेत्रेशुक्रचंद्रबु २०
धानामुदयोयदि॥षण्मासंस्याच्चदुर्भिक्षंमतिवृष्टिःप्रजायते
॥उदितोचबुधक्षेत्रेयदाराहुशनैश्चरो॥५७॥पशुक्षयःप्रजा

पीडाजायतेचमहर्घता॥ सूर्यक्षेत्रेसोमसूर्यः सूर्यपुत्रोदयेयदा॥ उ
दयास्तमनंपीडा।जायतेचमहर्घता॥५८॥ यदोदयःशनिक्षेत्रेभौम
भास्करयोर्भवेत्॥ घृतानांचतदावृद्धिर्गुडानांरक्तवाससां॥५९॥
यदासमुदयंयातिशनिक्षेत्रेशनैश्वरः॥ तदाचतृणकाष्ठानांलो
हानांचमहर्घता॥६०॥ ॥इतिग्रहोदयोराशिफलं॥ ॥गुरुर्य
दाविशाखायांतदाधान्यमहर्घता॥ मंगलेवर्षकालश्चशनौस
र्वत्रमंगलं॥६१॥ अग्निवर्णोयदार्द्रीयांशनिरग्नेस्तदाभवेत्॥ बुधे
भाद्रेचदुर्भिक्षंसुभिक्षंभृगुनंदने॥६२॥ सुभिक्षंचानुराधायांय
दिशेषाग्रहास्थिताः॥ कल्याणंचसुभिक्षंस्यादाश्लेषायांस्थिते
गुरौ॥६३॥ कुर्यात्साबहवोमंदेभौमेकटकपीडनं॥ बुधेतिलाश्च
माषाश्चमहर्घावर्षकालवत्॥६४॥ सूर्येसर्वाणिधान्यानिमहा

र्घाणिभवंतिच॥शुक्रेचमहतीवृष्टिःसस्यानिसफलानिच॥
॥६५॥मूलेगुरौकुलस्थानांमुद्गानांबहुधाभवः॥भौमेमु
द्गादयश्चापेबुधेस्युःसर्वसंपदः॥६६॥पूर्वाषाढागतेभौमे
पीडास्यात्पशुपक्षिणां॥केतौमहर्घताधान्येपूर्वाषाढागतेभ
वेत्॥६७॥उत्तराषाढगेजीवेगुडानांचमहर्घता॥भौमेच
पुष्पजातीनांजायतेचमहर्घता॥६८॥अभिजिन्नाम्निनक्ष
त्रेयदाछायासुतोभवेत्॥सर्वसस्यानिजायंतेसुभिक्षाणि
कुजेतथा॥६९॥श्रवणेचयदाजीवस्तदास्युःसर्वसंपदः॥
बुधेत्रासोराजपुत्रेशनौभूरिक्षसिरका॥७०॥कृत्तिका
यांचरोहिण्यांयदाजीवेहितिष्ठति॥मध्यमानिचसस्यानि

तदावृष्टिश्चमध्यमा ॥७१॥ आर्द्रायांमृगशीर्षेचयदावाचस्प
तिःस्थितः ॥ दुर्भिक्षंस्याद्नावृष्टिःप्रजानांचैवरोगता ॥७२॥
चित्रास्वात्योर्यदाजीवस्तदाचित्राःपयोधराः ॥ विचित्राणि
भवंत्येवसस्यानिचक्कचित्कचित् ॥७३॥ विशाखामैत्र
योर्जीवोधान्यंवर्षश्चमध्यमः ॥ ज्येष्ठामूलेमासयुग्मंवृष्टि
श्चैवप्रजायते ॥७४॥ अनावृष्टिश्चदुर्भिक्षंरेवत्यांसंस्थिते
गुरौ ॥ धनिष्ठायांचशुक्रेचपीडाभवतिहस्तिनां ॥७५॥
॥ ॥ इतिनक्षत्रगुरुचारः ॥ ॥ इतिश्रीकाशिनाथकृ
तौशीघ्रबोधेअर्घप्रकरणंसमाप्तं ॥ ॥ चूचेचोला
अश्विनी ॥ लीलूलेलोभरणी ॥ आईउएकृत्तिका ॥ वो

वा वि वू रोहिणी४।। बे बो का की मृगशीर ५ कू घं ङ छा आर्द्रा ६ के
को हा ही पुनर्वसू ७ हु हे हो डा पुष्य ८ डि डू डे डो आश्लेषा ९ मा मी
मु मे मघा १० मो टा टि टू पूर्वा ११ टे टो पा पी उत्तरा १२ पू षा णा ठा
हस्त १३ पे पो रा री चित्रा १४ रू रे रो ता स्वाती १५ ती तू ते तो वि
शाखा १६ ना नी नू ने अनुराधा १७ नो या यि यू ज्येष्ठा १८ ये यो
भा भी मूळ १९ बु धा फा ढा पूर्वाषाढा २० भे भो जा जी उत्तरा
षाढा २१ जू जे जो खा अभिजित।। खि खु खे खो श्रवण २२
गा गी गू गे धनिष्ठा २३ गो सा सि सू शततारका २४ से सो दा
दी पूर्वाभाद्रपदा २५ दू झा ञा था उत्तराभाद्रपदा २६ दे दो

चाचीरेवती ०॥ ॥आला मेष१ उवा वृषभ२ काथा मिथुन३ डाहा क
र्क४ माठा सिंह५ पाटा कन्या६ राता तूळ७ नाया वृश्चिक८ भाधा
धन९ जाखा मकर१० गोसा कुंभ११ दाचा मीन१२॥ तनु१ ध
नु२ भ्रात्र३ बंधु४ पुत्र५ शत्रु६ कलत्र७ का:॥ मरणं८ धर्म९ क
र्मा१०य११ व्यय१२ द्वादशराशय:॥ ॥सप्तविंशतिभानां



चनवभिर्नवभि:पदै:॥ अश्विनीप्रमुखानांच
मेषाद्या राशय:स्मृता:॥१॥ दशापंचाष्टमे तु
र्ये सप्तमे विंशतिस्तथा॥ विश्वावसु ग्रहदृष्टी
नामस्थानेषु दर्शिति:॥२॥ आये व्यये धनेल
ग्ने षष्ठे च ग्रहदृष्टय:॥ तृतीये दशमे मंदे नव

मेपंचमेगुरुः॥३॥ विंशातिर्वीक्ष्यते विश्वा चतुर्थे चाष्टमे कुजः॥
रविवारेण संयुक्ता यदास्यात्सौषज्येछयोः॥ अमावास्यां तदापृ
थ्वीरुंडमुंडा च जायते॥ अयन त्रिगुणा मासा एकपंचाशदन्विता॥५॥
२२ दलिता घटिकास्तेयाः पला स्त्रिगुणवासरा॥ एकपक्षे यदा
यांति तिथयश्च त्रयोदश॥६॥ त्रयस्तदा क्षयं याति वाजिनो
मनुजा गजाः॥ सूर्ययुक्ताश्च नक्षत्राद्दद्याद्धिसेस्त्रयंत्रयं॥७॥
आदित्यश्च बुधः शुक्रः शनिश्चरः कुजस्तथा॥ जीवो राहुश्च के
तुश्च होमे क्रूरास्त्वशोभनाः॥८॥ आदित्ये च भवेच्छोको बुधे संप २२
त्तिरुत्तमा॥ शुक्रे स्याच्च धनप्राप्तिः शनोपीडा च जायते॥९॥
चंद्रे भवति लाभश्च भौमे चैव तु बंधनं॥ गुरो परमकल्याणं राहो

हानिश्चसर्वदा ॥१०॥ केतोचप्राणसंदेहोवह्निचक्रमुदाहृतं ॥
॥ ॥ इतिकोटिहोमः ॥ ॥ प्रभवोविभवःशुक्लः प्रमोदोथप्र
जापतिः ॥ अंगिराःश्रीमुखोभावोयुवाधातातथैवच ॥१॥ ईश्व
रोबहुधान्यश्चप्रमाथीविक्रमोवृषः ॥ चित्रभानुःसुभानुश्च
तारणःपार्थिवोव्ययः ॥२॥ ब्रह्मणोविंशतिस्त्वेतेसृष्टिरत्रप्र
जायते ॥ ॥ सर्वजित्सर्वधारीचविरोधीविकृतिस्तथा ॥३॥
खरोनंदननामाचविजयश्चजयोपरः ॥ मन्मथोदुर्मुखश्चान्यो
हेमलंबीविलंबकौ ॥४॥ विकारीशार्वरीचान्यःप्लवश्चशुभकृ
तथा ॥ शोभनश्चतथाक्रोधीविश्वावसुरथोपरः ॥५॥ पराभ
वाख्योह्यवरोविष्णोरेतेतुविंशतिः ॥ प्लवंगःकीलकःसौम्यः

स्तथासाधारणोपरः॥६॥विरोधकृत्समामाख्यातःपरिधावीप्रमा
द्यपि॥आनंदोराक्षसश्चापनलःपिंगलनामकः॥७॥कालःसि
द्धार्थरौद्रोचदुर्मुखीदुंदुभिस्तथा॥अपरोरुधिरोद्गारीरक्ताक्षीक्रो
धनस्तथा॥८॥क्षयकृद्वत्सराश्चैमेरुद्रस्यैवतुविंशतिः॥वत्सरा:
२४ षष्टिराख्यातानामतुल्यफलप्रदाः॥९॥ ॥इतिषष्टिसंवत्सर
नामानि॥ ॥मेषवृश्चिकयोर्भौमःशुक्रोवृषतुलाश्रितः॥बुधः
कन्यामिथुनयोःप्रोक्तःकर्कस्यचंद्रमाः॥१०॥स्यान्मीनधन्विनो
जीवःशनिर्मकरकुंभयोः॥सिंहस्याधिपतिःसूर्योराशिनाथाउदा २४
हृताः॥११॥ ॥इतिराशीनामधिपतयः॥ ॥कन्याराहुगृहंप्रो
क्तंकेतुश्चमिथुनस्यच॥मासंशुक्रबुधादित्याःसपादचंद्रोदिनद्वयं॥
॥१२॥भौमस्त्रिपक्षंजीवोब्दंसार्धवर्षद्वयंशनिः॥राहुकेतुःसदाभु

क्तेसार्द्धमेकंतुवत्सरं॥१३॥ ॥इतिग्रहाणांराशिस्थितिः॥ ॥कार्तिकद्वि
गुणमासागताभिस्तिथिभिर्युताः॥सप्तविंशतिभिर्हीनादिनतारेकसं
युताः॥१४॥सार्द्धमासद्वयंसूर्यमंडलेचतनोवसेत्॥उदितःपश्चि
मेभागेनवमासंसमीक्ष्यते॥१५॥७॥२२॥दशाहात्सूर्यमध्येतु
ततश्चास्तमितोवसेत्॥एकयामेपुरेवापिदुर्भिक्षेराजविग्रहे॥२३॥
विवाहेतीर्थयात्रायांशुक्रदोषोनविद्यते॥ ॥इतिशुक्रउदयास्तवि
चारः॥८॥दशार्द्राद्याःस्त्रियस्ताराविशाखाद्यानपुंसकाः॥तिस्र
स्ततश्चमूलाद्याःपुरुषास्युश्चतुर्दश॥स्त्रीपुंसयोर्महावृष्टिःस्त्रीन
पुंसकयोःक्वचित्॥२५॥स्त्रियोस्तुशीतलाछायायोगेपुरुषयोर्नच
॥उदयास्तमनेशुक्रोबुधश्चवृष्टिकारकः॥२६॥जलराशिस्थित
श्चंद्रःपक्षांतेसंक्रमेतथा॥बुधःशुक्रःसमीपस्थःकरोत्येकार्णवांम

हीं॥२७॥तयोरंतर्गतोभानुःसमुद्रमपिशोषयेत्॥ चलत्संगारकेदृ
ष्टिस्त्रिधादृष्टिःशनैश्वरे॥ वारिपूर्णांमहींकृत्वापश्चात्संचरतोगु
रुः॥२८॥ इतिदृष्टिविचारः॥ ॥ कर्केकुंभेचसिंहेचमकरेचादिवाक
३५ रे॥ पूर्वंवापश्चिमंवापिद्वारंकुर्याच्चवेश्मनां॥२९॥ मेषेवृषेवृश्चिकेच
तुल्लेवापियदारविः॥ ग्रहंद्वारंतदाकुर्यादुत्तरंचापिदक्षिणं॥३०॥
धनुर्मिथुनकन्यासुमीनेचयदिभानुमान्॥ नकर्तव्यंतदागेहं
कृतेदुःखमवाप्यते॥३१॥ ॥इतिगृहद्वारविचारः॥ यदेकमा
सेग्रहणंजायतेशशिसूर्ययोः॥ शास्त्रकोपैःक्षयंयांतितदाभूपाः ३५
परस्परं॥३२॥ ग्रस्तोदितौचग्रस्तास्तौधान्यभूपालनाशकौ॥
सर्वग्रस्तौचंद्रसूर्यौदुर्भिक्षमरणप्रदौ॥३३॥उपरागोयदामेषे
पीड्यंतेचतदाजनाः॥ कंबोजांध्रकिराताश्चैवकलिंगकाः॥३४॥
पांचालाश्च

दाः
वृषेचग्रहणेगोपाः पशवः पथिकाजनाः॥ पीड्यंतेवाह्लिकामात्स्याः
यमुनातटवासिनः॥ कर्कटेग्रहणेपीडामल्लादीनांचजायते॥ आ
भीरशबराणांचतथामत्स्यनिवासिनां॥ सिंहेचग्रहणेपीडासर्वे
षांवनवासिनां॥ नृपाणांनृपतुल्यानांमनुजानांचजायते॥ ३७॥
कन्यायांग्रहणेपीडात्रिपुराणांचजायते॥ कवीनांलेखकानां
चजायतेपीडनंतदा॥ ३८॥ तुलायामुपरागेचदशार्णाःकंक
वाकुकाः॥ मखिनश्चपरात्याश्चपीड्यंतेसाधवश्चये॥ ३९॥ वृ
श्चिकेग्रहणेपीडासर्पजातेश्चजायते॥ उडुंबरस्यचोलस्यमंद्र
स्याधेयकस्यच॥ ४०॥ यदोपरागश्चापेचतदापीडाचवाजिनां॥
विदेहमल्लपांचालाः पीड्यंतेभिषजोविशः॥ ४१॥ मकरेग्रहणे
पीडानीचानांमंत्रवादिनां॥ स्थावराणांभटानांचचित्रकूटे

३६

स्यसंक्षयः॥४२॥कुंभोपरागेपीड्यंतेगिरिजाःपश्चिमाजनाः॥तस्करादरदाःभीरादेशाबर्बरकादयः॥४३॥मीनोपरागेपीड्यंतेजलद्रव्याणिसागरे॥जलोपजीविनोलोकायेचम्रस्तास्तथानराः॥४४॥ ॥इतिग्रहफले॥ क्षयंकृत्यांसुवृष्टिश्चनीहारश्चक्षयंकरः॥विद्युत्पातोग्निदाघीचपरिवेषश्चरोगकृत्॥४५॥दिग्दाहोग्निभयंकुर्यान्निर्घातोनृपभीतिदः॥झंझवायुश्चंडशब्दोबकूभीतिप्रदायको॥४६॥ग्रहयुद्धेराजयुद्धंकेतोदृष्टेतथैवच॥ग्रहणांतेमहावृष्टिःसर्वदोषनिवारिणी॥४७॥ ॥इतिधूलिवृष्ट्यादिफलं॥ ॥अश्विन्यामुदितःकेतुर्हन्यादश्मकपालकं॥भरण्यांचकिरातेशंकृत्तिकायांकलिंगपं॥४८॥रोहिण्यांशूरसेनेशंमृगेचोशीनराधिपं॥आर्द्रायांजलजाधीशमश्मकेशंपुनर्वसौ॥४९॥पुष्येचमगदाधीशंसार्पायांकाशिकाधिपं॥मघायामंगनाथंचपूर्वीयांयदुनायकं॥५०॥उज्जयिन्यान्नृपंहन्यादुत्तराफाल्गुनीगतः॥

३६

दंडकाधिपतिर्हस्ते चित्रायां कुरूभूमिपं ॥५१॥ स्वात्यां काश्मीरकांबोजभूप
तीनां विनाशकः ॥ इक्ष्वाकुकेरलेशानां विशाखायां विनाशकः ॥५२॥
मैत्रायामिंद्रनाथं च सार्वभौमं तथेंद्रके ॥ अंधमद्रकनाथो च मूलस्थो
हंति निश्चितं ॥५३॥ पूर्वाषाढे काशिराजमुत्तराषाढके तथा ॥ योधेय
शिबिवैधेशं श्रवणे केरलेश्वरं ॥५४॥ वशौ पंचनदाधीशं वारूपे सिं
हलेश्वरं ॥ पूर्वाभाद्रपदे चांगं नैमिषेयां तथोत्तरे ॥५५॥ रेवत्यामुदिते
केतौ किराताधिपतेर्वधः ॥ धूम्राकारः समुत्थश्चेत्केतुर्विश्वस्यपीड
कः ॥५६॥ ॥इति केतूदयफलं॥ ॥भानुभौमार्किवारे च कार्त्तिकेंदु
क्षपो भवेत्तु ॥ आयुष्मान्स्वातिसंयुक्तो नृपनाशः पशुक्षयः ॥५७॥
धनुर्मृगौ च मेषाद्याश्चत्वारः स्युर्निशाबलाः ॥ ते विना मिथुनं पंच
ज्ञेयाः पृष्ठोदया बुधेः ॥५८॥ शीर्षोदयाश्च चत्वारः सिंहाद्याः कुंभ

एवच॥ दिवाबलाश्चमीनस्तुबलीरात्रौतथादिवा॥५९॥ तद्वर्षाद्विगु
णीकृत्यरामैर्हीनंचकारयेत्॥ मुनिभिश्चहरेद्भागंशेषांकेचफलंभ
वेत्॥६०॥ चंद्रेवेदेचदुर्भिक्षंसुभिक्षंयुग्मबाणयोः॥ रामेरसेमध्य
३९ मंचशून्येशून्यंप्रकीर्तितं॥६१॥ अतीचारेगतेसौम्येक्रूरेवक्रकल
मागते॥ हाहाभूतंजगत्सर्वंरुंडमुंडाचजायते॥६२॥ मंत्रस्वीका
रणंचैत्रेबहुदुःखफलप्रदं॥ वैशाखेरत्नलाभःस्याज्ज्येष्ठेचमर
णंध्रुवं॥६३॥ आषाढेबंधुनाशःस्यात्श्रावणेतुशुभावहं॥ प्रजा
हानिर्भाद्रपदेसुखदंचाश्विनेभवेत्॥६४॥ कार्तिकेधनवृद्धिः ३९
स्यान्मार्गशीर्षेशुभप्रदं॥ पोषेतुज्ञानहानिःस्यान्माघेमेधावि
वर्द्धनं॥६५॥ फाल्गुनेसर्वसौभाग्यंआचार्यैःपरिकीर्तितं॥
॥२६६॥ ॥ इतिश्रीकाशीनाथविरचितंशीघ्रबोधःसमा

ऽनंत
स्तः॥ ॥शाके १७०४ शुभकृत् भाद्रशुक्लचतुर्दश्यां भृगौ नागपु
रे श्री मद्यशोधन नाना राजपुरोहितस्येदं पुस्तकं॥ मराठेप
नाम महादेवसुत मोरेश्वरेण लिखितमिदं पुस्तकं॥ ॥ श्री॥
लेखकपाठकयोः शुभं भवतु॥ ॥यादृशं पुस्तकं दृष्ट्वा तादृशं
लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न विद्यते॥ ॥अ
दृश्यभावान्मतिविभ्रमत्वात्पदार्थहीनं लिखितं मयात्र॥ तत्स
र्वमार्यैः परिशोधनीयं कोपं न कुर्यात् खलु लेखकस्य॥ १॥

इति श्री शीघ्रबोधः समाप्तः ॥ श्री ॥

KKSU LIBRARY
RAMTEK
441106
M-1646
Dist Nagpur

```
[OrderDescription]
,CREATED=30.09.20 16:32
,TRANSFERRED=2020/09/30 at 16:43:49
,PAGES=79
,TYPE=STD
,NAME=S0003791
,Book Name=M-1646-SHIGRABODH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,
```